अथसटीकयोगवासिष्ठसारप्रारंभः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा·
सा·
१

॥श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्रीगुरुभ्योनमः॥ लक्ष्मीकान्तंनमस्कृत्ययथामतिविरच्यते॥ वासिष्ठसारविवृतिः परोपकृतयेमया॥१॥ वसिष्ठेनयतीन्द्रेणोपदिष्टाद्राघवंप्रति॥ सारमुद्धृत्यवान्कश्चिद्ब्रह्मविद्यामहार्णवात्॥२॥ तत्रादौवसिष्ठसाराख्यंग्रंथमारिप्सुस्तत्प्रतिपाद्यंइष्टदेवतानतिरूपंमङ्गलमाचरति॥ दिकालेति॥ एवंविधायशांतायगुणातीतायतेजसेब्रह्मरूपायनमः॥ तेजःशब्देनात्रब्रह्मैवनभौतिकंतेजस्तस्य वक्ष्यमाणलक्षणानुपपत्तेः॥ किंभूतायतेजसेदिक्कालादिभिरनवच्छिन्नानंतरूपतयापरिच्छिन्नाअनंताअवि

॥श्रीगणेशायनमः॥ दिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्तये स्वानुभूत्यैकमानायनमःशांता
यतेजसे॥१॥ अहंबद्धोविमुक्तःस्यामितियस्यास्तिनिश्चयः नात्यंतमज्ञोनोतज्ज्ञःसोस्मिञ्छास्त्रेधिका
रवान्॥२॥

नाशिनी चिन्मात्रज्ञानरूपामूर्त्तिःस्वरूपंयस्यतस्मै॥ पुनः स्वानुभूतिः स्वानुभवएवैकंमानंप्रमाणंयत्रतस्मैअनुभवैकवेद्याय॥ अवचनेनप्रोवाचेतिश्रुतेः॥ एवंमंगलंविधायात्रशास्त्रेअधिकारिणंदर्शयति॥ अहंबद्धइति॥ रागद्वेषादिनाबद्धोहंकथंमुक्तोभवेयंइतियस्यनिश्चयोस्तिअतएवनात्यंतंअज्ञोमूर्खोनापितज्ज्ञःपंडितः॥ सोत्रशास्त्रेऽधिकारी॥ ब्रह्मज्ञस्यतुज्ञानवत्वादेवनाधिकारः॥ मूर्खस्यउपदेशवैयर्थ्यादेवाधिकाराभावः॥ तस्मात्किंचि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवमधिकारिणं निरूप्य सद्गुरुसेवादिकं ब्रह्मज्ञानसाधनं निरूपयति । यावदिति ॥ यावत्परमेश्वरात्साक्षादनुग्रहः न जायते तावत्कश्चिदपि पुमान् सद्गुरुं सच्छास्त्रं नाभ्यसेत् ॥ गुरुसेवा सच्छास्त्राभ्यासश्च परमेश्वरानुग्रहादेव भवतीत्यर्थः ॥ ३ ॥ ननु गुरुसेवया किं स्यादित्यत आह ॥ महानुभावेति ॥ महानुभावस्य ब्रह्मज्ञस्य गुरोः संपर्कात्सेवया संसारसमुद्रतरणे युक्तिः उपायः प्राप्यते ॥ नाविकान्यथा समुद्रतरणे दृढा तारणसमर्था नौः प्राप्यते ॥ गुरूपदिष्टमार्गेण सं

यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् । तावन्न सद्गुरुं कश्चित्सच्छास्त्रं वापि नो लभेत् ॥ ३ ॥ महानुभावसंपर्कात्संसारार्णवलंघने । युक्तिः संप्राप्यते राम दृढा नौरिव नाविकात् ॥ ४ ॥ संसारदीर्घरोगस्य सुविचारो महौषधम् । कोऽहं कस्य च संसारो विवेकेन विलीयते ॥ ५ ॥ यस्मिन्देशे हि तत्त्वज्ञो नास्ति सज्जनपादपः । स फलः शीतलच्छायो न तत्र दिवसं वसेत् ॥ ६ ॥

सारस्तीर्यत इत्यर्थः ॥ ४ ॥ संसारेति ॥ अहं कः कस्य वा संसारः इति यो विचारः संसाररूपदीर्घरोगस्य महौषधं ॥ यतो विवेकेनैव संसारो विलीयते नश्यति । यथौषधेन रोगशान्तिस्तथा विचारेण संसारशान्तिरिति भावः ॥ ५ ॥ यस्मिन्निति ॥ यस्मिन्देशे एवंविधः सज्जनपादपः सत्पुरुषवृक्षो नास्ति तत्र दिवसमपि नैव वसेत् ॥ न दिनं स्थातव्यं ॥ तत्त्वज्ञमुमुक्षुणा ॥ कीदृशः सज्जनवृक्षः तत्त्वज्ञः तत्त्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· तत्वंब्रह्मस्वरूपंजानातीतिवा॥सफलःफलेनब्रह्मज्ञानोपायेनसहितः॥शीतलाआनंदकारिणीछायाकांतिर्य प्र· १
सा· स्ययथातत्वंवृक्षत्वंजानातीतिवा॥यत्रईदृशाःफलसहितोघनछायोवृक्षस्तत्त्वज्ञानीवानास्तितत्रदिनेनवसेदिति
२ ध्वनिः॥६॥सदेति॥सत्पुरुषायद्यपिउपदेशंनददाति॥तथापिअभिगंतव्याःसेव्याःसदा॥यतस्तेषांयाःस्वैच्छाकथा
स्ताएवोपदेशाः॥सतांब्रह्मकथयैवकालनिर्गमनादित्यर्थः॥७॥शून्यमिति॥सत्पुरुषसंगात्शून्यंपूर्णभावंप्राप्नोति

सदासंतोभिगंतव्यायद्यप्युपदिशंतिन याहिस्वैरकथास्तेषामुपदेशाभवंतिताः॥७॥ शून्यमापू
र्णतामेतिमृत्युरप्यमृतायते आपत्संपदिवाभातिविद्वज्जनसमागमात् ८ ज्ञानिनामपिचि
त्तंचेत्केवलात्मसुखोदितं सत्वाःसंसारदुःखार्ताःकंयांतिशरणंतदा ९ तज्ज्ञानंसचशास्त्रार्थ
स्तद्विज्ञानमखंडितं सच्छिष्यायविरक्तायसाधोर्यदुपदिश्यते॥१०॥

मृत्युरप्यमृतोभवति।आपत्दुः
खमपिसुखरूपंभवति।वस्तुतःशून्यमृत्युदुःखानांब्रह्मण्यभावादित्यर्थः ज्ञानिनःसर्वथादीनंशरणागतंदृष्ट्वोप राम
दिशंत्येवेत्याह।ज्ञानिनामपिचित्तंकेवलंआत्मसुखायैवोदितंचेत्तदासंसारदुःखव्याप्ताःप्राणिनःकंशरणंयांति २
।तस्मात्ज्ञानिनःपरोपकाररताभवंतीतिभावः॥ किंत्वत्तज्ज्ञानमिति॥तदेवज्ञानंसएवशास्त्रार्थःतदेवाखंडितंवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपदेशोतिहेरामगुरूपदेशक्रमस्तु मर्यादापालनमेव। ब्रह्मज्ञानस्य अयमेवात्माब्रह्मेतिमहावाक्यार्थोपदे
शदृढीकरणस्यकारणंतु शिष्यप्रज्ञैवकेवलानान्यदित्यर्थः॥ शिष्यप्रज्ञानंविनाउपदेशोऽनर्थकइत्यर्थः॥ ११॥
तदेवाह॥ नशास्त्रैःगुरुणापिकृत्वापरमेश्वरोद्रष्टुंशक्यते॥ सत्वगुणस्थयानिजबुध्यैवस्वयमीश्वरोदृश्यते॥
मननपरेणात्माप्राप्यतइत्यर्थः॥ १२॥ सर्वापीति॥ अन्यासर्वाअध्ययनादिकलाःप्राणिनःअभ्यासाभावेननाश

उपदेशक्रमोरामव्यवस्थामात्रपालनं। ज्ञप्तेस्तुकारणंशुद्धंशिष्यप्रज्ञैवकेवला ११ नशास्त्रैर्नापि
गुरुणादृश्यतेपरमेश्वरः। दृश्यतेस्वात्मनैवात्मास्वयासत्वस्थयाधिया १२ सर्वाप्येवकलाजंतोर
नभ्यासेननश्यति। इयंज्ञानकलात्वंतासकृज्जाताभिवर्धते १३ स्वकंठेपिस्थितंवस्तुयथानप्राप्य
तेभ्रमात् भ्रमांतेप्राप्यतेतद्वदात्मापिगुरुवाक्यतः १४ स्वस्वरूपमजानन्वैजनोयदैववर्जितः॥ १५

माप्नोति। ज्ञानलेशस्तुसकृदपिजातोवर्धतएवननश्यति॥ १३॥ स्वकंठइति। यथास्वकंठस्थितमपिवस्तुमण्यादिकं
भ्रांतिवशात्नप्राप्यतेनज्ञायते। नदेवचभ्रमनाशे यथाप्राप्यते। तद्वत्आत्मास्वयमेवस्वाहृत्तमानोपिगुरुवाक्यत
एवप्राप्यतेनान्यथा। तस्माद्गुरुंशरणंयायादित्यर्थः॥ १४॥ स्वेति॥ अयंजनःभाग्यवर्जितः। यतःस्वस्वरूपस्वकीयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥७७॥ःछ ईप्र

यो॰ वा॰ सा॰ २

अज्ञानन्सन्विषयेसुखंवेत्ति जानाति। परंतुपरिपाके विषसंपृक्तान्नभोजनवत् दुःखमेवाप्नोतीत्यर्थः॥१५॥
एवमात्मज्ञानसमुखंकृत्वावैराग्यार्थमाह॥ बुध्वेति। योदुर्मतिःविषयाणांनिरसतांज्ञात्वापितत्रैवभूयःपुनःस्नेहं
करोतिनासोपुरुषोगर्दभएव। कस्मात्समानधर्मत्वात् गर्दभएवेत्यर्थः। विषयफलंपरत्वेगर्दभनरयोरभेदइतिभा
वः॥१६॥ यत्किंचिदिति। कस्यापिपदार्थस्यसंकल्पनान्नरोनरकमाप्नोति। संकल्पाभावेचाक्षयंमोक्षसुखमेवाप्नो

विषयेतुसुखंवेत्ति पश्चात्पाकेविषान्नवत् १५ बुध्वाप्यनित्यंतत्रैवस्नेहपः पदार्थेषुदुर्मतिः। वक्षा
तिभावनाभूयोनरोनासौसगर्दभः १६ यत्किंचिदपिसंकल्पान्नरोदुःखेनिमज्जति नकिंचिद
पिसंकल्पात्सुखमक्षयमश्नुते १७ यथास्वप्नेमुहूर्तेस्यात्संवत्सरशतभ्रमः तथामायाविला
सोयंजायतेजाग्रतिभ्रमः १८ योन्तःशीतलयाबुध्वारागद्वेषविमुक्तया साक्षीवत्पश्यतीदंहि
(जीवितंतस्य

ति॥१७॥ यथेति। मुहूर्तकालमात्रेयथाशतसंवत्सरभ्रमोभवति। एवंजाग्रदवस्थायांअ
यंसंसारोमायाविलासरूपोमरीचिनोयवन्मिथ्याभूतइत्यर्थः॥१८॥ योन्तइति। योनरोरागद्वेषरहितयाअतएवां
न्तःशीतलयासानंदयाबुध्यासाक्षीवदिदंविश्वंविलोकयतितस्यैवजीवितंशोभते। रागद्वेषत्यागेमुक्तिरित्यर्थः॥

शोभते १९

राम २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥येनेति। हेयोपादेयं उज्झितात्यजनाइदं मयाग्राह्यमिदं मयात्याज्यमिति संकल्पं त्यजता सता येन बुद्धौ प्रतिफलि
तं चैतन्यं ब्रह्म सम्यक् ज्ञातं। तस्य जीवितं सफलं॥ २०॥ इदानीं मरणनिमित्तशोको न कार्य इत्याह॥ हृदयेति। देह
नाशात् हृदयावच्छिन्नस्याकाशस्येव नाशो न भसोवच्छिन्नत्वं नश्यति। यथा घटनाशे घटावच्छेद एव नश्यति। न
त्वाकाशं। तथा शरीरनाशेपि देहसंबंध एव नष्टो न त्वात्मा नश्यति। अतो जना मूढा आत्मा नष्ट इत्युक्त्वा मिथ्यैव शो

येन सम्यक् परिज्ञातं हेयोपादेयमुज्झता। चित्तस्यांते स्थितं चित्तं जीवितं तस्य शोभते २० हृदया
काशमात्रस्य विनाशो देहनाशतः व्यर्थंभूतानि शोचंति नष्ट आत्मेति शंकया २१ घटादिषु प्रण
ष्टेषु यथाकाशमखंडितं तथा देहेषु नष्टेषु देही नित्यमलेपकः २२ न जायते म्रियते वा क्वचित्किं
चित्कदाचन जगद्विवर्त्तरूपेण केवलं ब्रह्म जृंभते २३ आकाशादपि विस्तीर्णः शुद्धः सूक्ष्मोऽव्य

कं कुर्वंति॥ २१॥ तदेवाह॥ घटादिष्विति। घटादिपदार्थेषु नष्टेषु आकाशं अखंडितमेव। तथा देहनाशेपि देही प्र
रूपः अखंडित एव निर्लेपक इत्यर्थः॥ २२॥ न जायत इति। क्वचित्किंचिन्नोत्पद्यते। न च नश्यति। किंतर्हि ब्रह्मैव जग
द्विवर्त्तस्वरूपेण प्रकाशते। यथा रज्जौ कालत्रयेपि सर्पादिकं नास्ति। तथापि रज्जौ सर्पो जायते नश्यत इति च। भ्रमव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· हेराम। ईदृशः आत्मा सकथंजायते म्रियते वा॥ कीदृशः। आकाशादपिव्यापकः॥ शुद्धो निर्मलः निर्लेपः सूक्ष्मो दुर्ज्ञे प्र·
सा· यः। अव्ययोऽविनाशी। शिवो मंगलरूपः। नहि देशकालस्वरूपपरिच्छेदरहितस्यजन्मनाशौ संभवत इत्यर्थः॥२७ २
४ ॥सर्वमिति। इदं दृश्यमानं सर्वं जगत्। आदिमध्यांतवर्जितं भावरहितं ब्रह्मैवज्ञेयमितिज्ञात्वा सुखीभव॥२८॥
वरमिति हेराम हस्तेखर्परं गृहीत्वा चांडालगृहेषु भिक्षार्थं गमनं श्रेयो न तु आत्मज्ञानरहितं जीवितमित्यर्थः॥२९॥

अयमात्मा कथं राम जायते म्रियतेथवा २७ सर्वमेकमिदं शांतमादिमध्यांतवर्जितं भावाभावविनिर्मुक्तमिति ज्ञात्वा सुखीभव २८ वरं शरावहस्तस्य चांडालागारवीथिषु भिक्षार्थमटनं राम न मौर्ख्यहतजीवितं २९ नव्याधिर्न विषं नापत्तथा नाधिश्च भूतले दुःखाय स्यच्छरीरोत्थं मौर्ख्यमेतद्यथा नृणां ३० ॥इति श्रीयोगवासिष्ठसारे वैराग्यप्रकरणं प्रथमं समाप्तं॥ वसिष्ठ उवाच संयमान्मनसः शांतिमेति संसारसंभ्रमः॥ एतदेव विवृणोति॥ नव्याधिरिति। व्याधिर्वातपित्तकफो
त्थः भवव्याधि विषापहारयो नराणां तथा दुःखदा न भवंति। यथा सहजं शरीरोत्थं देहभवं मूर्खत्वं आत्मानात्मविवेक
ज्ञानरहितं बहिर्मुखत्वमित्यर्थः॥३०॥ इति टीकायां प्रथमप्रकरणम्॥ इदानीं जगतो मिथ्यात्वं निरूपयति॥ संयमा

मनोनियमनात्संसारभ्रमो नश्यति। यथा मंदरगिरौ निश्चलतां याते सति क्षीरसमुद्रो वीचिरहितो भवति॥१॥ चित्तोन्मे
षेति। यतो मनसः संकल्पे संसारोदयः तदभावे संसाराभावः। अतो वासनाप्राणयोर्निरोधात्संकल्परहितं मनः कुरु। प्रा
णायामाभ्यासाद्वासनानाशान्मनोजय इत्यर्थः॥२॥ अयमिति। अयं मनसः संकल्पादुत्थितः संसारः निजसंकल्पना
शादेव नश्यति॥ अत्र न संदेहः॥३॥ परिज्ञानेनेति। चित्रलिखितसर्पस्य यथाज्ञानादेव सर्पत्वं नश्यति। तत्कृताभीति

मंदरे स्पंदतां याते यथा क्षीरमहार्णवः १ चित्तोन्मेषनिमेषाभ्यां संसारस्योदयक्षयौ वासनाप्राण
संरोधादनिमेषं मनः कुरु २ अयं हि स्वविकल्पोत्थः स्वविकल्पपरिक्षयात् क्षीयतेऽदग्धसंसा
रो निःसार इत्यसंशयः ३ परिज्ञानेन सर्पत्वं चित्रसर्पस्य नश्यति यथा तथैव संसारः स्थित एवो
पशाम्यति ४ पुंसो निजमनोमोहकल्पितो दुःखदः स्मृतः संसारचिरवेतालो विचारेण विलीयते
५ ईदृशी राम मायेयं या स्वनाशेन हर्षदा॥ श्चा। तथा आत्मा ब्रह्मज्ञानादेव संसारः शाम्यति। वस्तुतो नास्ती
त्यर्थः। यथा चित्रे सर्पस्तद्वत्॥४॥ पुंस इति। पुंसः पुरुषस्य स्वकीयमनसो मोहेनैव कल्पितो रचितः संसारलक्षणो
बहुकालीनो वेतालः येनतः तत्त्वविचारेण अयमात्मा ब्रह्मेति विचारेणैव नश्यति॥ तस्माद्विचारेण स नाशनीयो यतो दुः

यो· वा· सा· ५

हे राम ईदृशी विलक्षणस्वभावा माया। या स्वनाशेन हर्षप्रदा। विलोक्यमाना च नाशमाप्नोति। अतोऽस्याः स्वभावो न ज्ञायते॥ ६॥ अहो इति। हे तात। अहो आश्चर्यमेतत्। यदियं चित्रा विचित्रा माया विश्वस्य मोहकारिका। यया मोहितो यमात्मा शरीरी सर्वांगव्याप्तमप्यात्मानं न जानाति॥ ७॥ यदिदमिति। यदिदं दृश्यमानं जगत् तत्किमपि नास्ति न भूतं न भविष्यति। यथा गंधर्वनगरं यथा वा मरुस्थले रविकिरणेषु जलभ्रमः कालत्रयेऽपि नास्ति॥ ८॥ यत्त्विति। य

नलक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणेव नश्यति ६ अहो नु चित्रा माययं तात विश्वविमोहिनी सर्वांगप्रोतमप्यात्मा यया त्मानं न पश्यति ७ यदिदं दृश्यते किंचित्तन्नास्ति किमपि ध्रुवं यथा गंधर्वनगरं यथा वारि मरुस्थले ८ यत्तु नोदृश्यते किंचिदंतस्थमपि किंचन अविनाशं तदस्तीह सत्तदात्मेति कथ्यते ९ स्वज्ञानदर्पणस्फारे समस्ता वस्तुजातयः द्रुमास्ताः प्रतिबिंबंति सरसीव तटे द्रुमाः १० सर्गश्चित्स्पंदमात्रात्मा सम्यग्दृष्टो विलीयते॥

न अंते समीपे स्थितमपि वस्तु किमपि न दृश्यते। परंतु अविनाशं तद्रूपं तदस्ति स एव आत्मेति कथ्यते। स एव साक्षात्कारणीयः इत्यर्थः॥ ९॥ स्वज्ञानेति। स्वकीये ज्ञानरूपे दर्पणे दृश्यमाना वस्तुजातयः सर्वाः प्रतिबिंबत्तामापद्यंते। यथा तटद्रुमाः सरसि प्रतिबिंबंति॥ १०॥ सर्गेइ

प्र· २

एम ५

सम्यग्ज्ञाने सति नश्यति॥ मिथ्याज्ञाने सति उदयमाप्नोति। यथा तमसि दृश्यमानायां रज्जौ सर्पभ्रमः उदेति। रज्जुयाथार्थ्य
ज्ञानान्नश्यति च तद्वदित्यर्थः॥ ११॥ भोगेति। मिथ्याभूतोप्ययं बंधो भोगवासनया दृढत्वं याति॥ वासनाशांत्या च बंधोपि तानवं
तनुतां तनुत्वं कार्श्यमाप्नोति तत्तस्मात्सा त्याज्येत्यर्थः॥ १२॥ मन इति। व्यापकात्परमात्मनः सकाशात् स्थिरात्। अस्थिराका
रं चंचलं मन उत्पद्यते। स्थिरादस्थिरोत्पत्तौ दृष्टांतः॥ यथा स्थिरादपि समुद्रादस्थिरा ऊर्मयः उत्पद्यंते तद्वदित्यर्थः॥१३॥ य

उदेत्यसम्यग्दृष्टौ तु रज्ज्वां सर्पभ्रमो यथा ११ भोगभावनया याति बंधो दार्ढ्यमवस्तुजः यथोपशांतया
याति बंधो जगति तानवं १२ मनः संपद्यते तस्मान्महतः परमात्मनः सुस्थिरादस्थिराकारं तरंग इव वा
रिधेः १३ यत्त्वयं स्वैरमेवाशु संकल्पयति नित्यशः तेनेयमिंद्रजालश्रीर्जागति प्रवितन्यते १४ यथा
बालस्य वेतालो मृत्युपर्यंतदुःखदः असदेव सदाकारं तथा मूढमतेर्जगत् १५ अनुत्पन्नस्य कनके
कानके कटके यथा॥

त्वयमिति। तदेवं मनोयं निरंतरं संकल्पं करोति। तेन संकल्पेन जाग्रदवस्थायां संसाररूपमिं
द्रजालमुत्पद्यते। अत एव मनःसंकल्पितः संसार इत्यर्थः॥१४॥ यथेति। यथा वेतालोभूतः बालस्य मूर्खस्य सर्वदा दुःखम
दो भवति। तथा असन्मिथ्याभूतमेवैतज्जगत् भ्रांतबुद्धेर्नरस्य सत्याकारं भासमानं सन्मरणपर्यंतानि दुःखानि ददाति॥१५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो॰वा॰ यथा सुवर्णे अज्ञुत्पन्नस्य यावज्जीवं सुवर्णमजानतो नरस्य कनकनिर्मितेकटककुंडलादौ कटकाद्येवेदमिति सत्यबुद्धिर्भ
सा॰ वतिनत्विदं हेमेति कदापि बुद्धिस्तज्ज्ञानाभावादेवेति ॥१६॥ तथा अज्ञस्य पुंसो नगरगृहवृक्षपर्वतसर्पादिविषयाहृश्यभूतेवबु
६ द्धिः सत्यैव। परंतु विकारात्मकं सर्वं नाममधेयमात्रमर्थाभावात्॥ अधिष्ठानं परमार्थभूतं हकूपदार्थोब्रह्मैव सत्यमिति बुद्धिः
कदापि नोदेति। ब्रह्मज्ञानाभावादित्यर्थः॥१७॥ अज्ञस्येति। पूर्वोक्तमेव विशदयति। तत्वमजानतो विश्वंदुःखसमूहरूपमे

कटककव्यक्तिरेवास्ति न मनागपि हेमधीः १६ तथाज्ञस्य पुरागारनगनागेंद्रगोचरा इदंदृश्यं दृगेवा
स्ति न त्वन्या परमार्थदृक् १७ अज्ञस्य दुःखौघमयं ज्ञस्यानंदमयं जगत् अंधं भुवनमंधस्य प्रका
शं तु सचक्षुषः १८ यथा विशुद्ध आकाशे सहसैवाभ्रमंडलं भूत्वा विलीयते तद्वदात्मनीहाखि ॥१०॥
लं जगत् १९ आदित्याव्यतिरेकेण रश्मयो येन भाविताः आदित्य एव तेन स्यनिर्विकल्पः स उच्यते

व। तत्वज्ञस्य परमानंदरूपमेतत्। तत्र दृष्टांतः। नेत्रहीनस्य जगदंधं तत्सहितस्य तु प्रकाशमेवेति ॥१८॥ यथेति। यथाऽ
तः शुद्धेपि गगने मेघपटलं भूत्वा पुनर्नश्यति तद्वद्ब्रह्मणि सर्वं जगदुत्पद्यते लीयते च। ब्रह्मणो न किंचिद्विशेषावहं॥१९॥ आ
दित्येति। येन सूर्यकिरणाः सूर्याद्भेदेन ज्ञाताः। न स्वेतकिरणाः सूर्यात्मका एवेति यथा। तथा येन ब्रह्माभिन्नं जगत् ज्ञातं तेन १

प्र॰ २

योगवासिष्ठसारः ॥ राम
१२
२८

विवर्त्तो इत्यर्थः

॥तंत्त्विति। यथा विचारितः पटस्तंतुमात्र एव तिर्यगूर्ध्वीभूततंतुव्यतिरेकेण पटाभावात् तथा विचारितं विश्वं ब्रह्मैव॥ जगदाकारेण ब्रह्मण एव परिणामो इत्यर्थः॥२१॥ विश्ववीचीति। ब्रह्मरूपादमृतसमुद्राज्जगल्लक्षणः कल्लोलविलासः उदेति तत्रैव विलीयते चेत्कथं मध्ये तन्मयो न स्यात्॥ यथा जलादुद्भूता लहरी लीयमाना वा जले लहरीदशायामपि जलात्मकैव॥२२॥ यथेति। जलादुद्भूताः फेनलहरीहिमबुद्बुदाः न जलाद्भिन्नाः तथा ब्रह्मणो विनिर्गतं विश्वं न ततो भिन्नं। कार्यका

तंतुमात्रो भवत्येव पटो यद्वद्विचारितः आत्मात्ममात्रमेवेदं तद्वद्विश्वं विचारितं २१ विश्ववीचीविलासोयं चित्सुधाब्धेरुदेति च विलीयते च तत्रैव मध्ये कथमतन्मयः २२ यथा न तोयतो भिन्नाः फेनोर्मिहिमबुद्बुदाः आत्मनोपि तथा भिन्नं विश्वमात्मविनिर्गतं २३ आत्मनोपि तथा विश्वमात्मन्येव लयं व्रजेत् मृदि कुंभो जले वीचिः कनके कुंडलं यथा २४ आत्मज्ञानाज्जगज्ज्ञाति ह्यात्मज्ञानान्निवर्त्तते रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाच्च निवर्त्तते २५॥

रणयोरभेदादित्यर्थः॥२३॥ आत्मनइति। ब्रह्मण एवोत्पन्नं विश्वं तत्रैव लीयते। तत्र दृष्टांतत्रयमाह॥ मृदीति। मृत्तिकायां घटो यथा। जले लहरी यथा। कनके सुवर्णे आभरणं यथा॥ तद्वदात्मनोपि विश्वमात्मन्येवेत्यर्थः॥२४॥ आत्मेति। ब्रह्मणोऽज्ञानाद्विश्वं भासेत

तदनन्यत्वमारंभणशब्दादिभ्य इति ब्रह्मसूत्रं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· तस्थेति। हे राम अहंश्यस्य दुर्ज्ञेयस्यात्मतत्त्वस्य विस्मरणेन जगत् स्थिरतां प्राप्तं॥ तज्ज्ञानान्नास्ति। यथा रज्जुज्ञानात् भुजंगो म·
सा· नास्ति॥ २६॥ स्वप्न इति एवमिति श्लोकद्वयेन। यथा स्वप्ने जाग्रदवस्थाना स्मृत्येव। स्मरणे च जागरणमपि मिथ्यैव। मरणे उत्प २
७ त्तिर्मिथ्याभूता। उत्पत्तौ मरणं तद्वत्॥ २७॥ एवं सत् असत् स्थूल सूक्ष्मं कार्यं कारणं वा तत्तु पटादिकं किंचिन्नास्ति॥ किंतु भ्रां
त्या सर्वमिदं भासते। किंच। सर्वमूलभूतात् ज्ञानरूपात् ब्रह्मण एव नानाज्ञानानि भवंति। ब्रह्मसत्तयैव विश्वसत्तांगीकारात् तस्य

तस्याहश्यात्मतत्त्वस्य विस्मृत्यैव स्थितिं गतं। जगत्स्यादीश्वराद्राम जगद्रज्जुभुजंगवत् २६ स्वप्ने
जाग्रदसद्रूपा स्मृतौ जाग्रदसद्वपुः मृतिर्जन्मन्यसद्रूपा मृतौ जन्माप्यसन्मयं २७ एवं न सन्नासदि
ति भ्रांतिमात्रं विजृंभते अनुभूयत एवाशु किंचित्सर्वानुभूतितः २८ ॥ इति श्री योगवासिष्ठसारे
जगन्मिथ्यात्वं द्वितीयं प्रकरणं॥ ॥ वसिष्ठ उवाच ॥
तत्त्वात्मबोध एवैकः सर्वाशा तृणपावकः प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः १ ॥ तिरेकेण किं

चिन्नास्तीत्यर्थः॥ इति टीकायां द्वितीयप्रकरणं समाप्तं॥ इदानीं जीवन्मुक्तिफलकं तत्त्वज्ञानं वर्णयति तत्त्वेति। परमात्मसाक्षात्कारे
णात्मज्ञानमेवैकं विषयतृष्णारूपतृणानां दाहकं भवति। तदेव तृष्णादाहकं ब्रह्मज्ञानं समाधिशब्देनोच्यते। न त्वेकांतमौनेन।

राम
७

चिदिति। इदं सर्वं जगत्। ब्रह्मरूपमेवेति भावयेत्। ईदृशी भावनायुक्त उपदेशांते ब्रह्मणि यः स्थितः स एव च सुखं जा
नाति। यतो ब्रह्म कवचः ब्रह्म कवचं यस्य स तथा॥२॥ सर्वेति। एवंविधो योगी ब्रह्मणैकीकृतचित्तो यस्तिष्ठति स परमे
श्वर एव नान्यः। कीदृशः। सर्वातीतं ब्रह्म परमेवावलंबते आश्रयतीति सः तथा। पूर्णेन्दुवत् शिशिरः शीतलः आशय
श्चित्तं यस्य स तथा॥३॥ ब्रह्मेति। यश्चित्तेन ब्रह्मप्रतिपादकानामुपनिषदां तत्त्वं भावयन् हर्षविषादरहितो भवति

चिदाकारमिदं सर्वं जगदित्येव भावयेत्। स्थित उपशांतस्थः स ब्रह्मकवचः सुखी २ सर्वा
तीतपदालंबी पूर्णेन्दुशिशिराशयः यस्तिष्ठति सदा योगी स एव परमेश्वरः ३ ब्रह्मोपनिषदां
तत्त्वं भावयन्नांतरात्मना नोद्वेगी न च तुष्टात्मा संसारे नावसीदति ४ यथा पर्वतमादीप्तं नाश्र ॥१०॥
यंति मृगा द्विजाः तद्वद्ब्रह्मविदं दोषा नाश्रयंति कदाचन ५ असंत इव संतोऽपि कोपयंति परं

॥ स एव संसारे दुःखरहितो भवति॥ अन्यः सर्वो दुःखवानेवेत्यर्थः॥४॥ यथेति। यथा दावाग्निना संदग्धपर्वतं मृगप
क्षिणो न सेवंते॥ तद्वत् कामक्रोधादयो दोषाः ब्रह्मज्ञानिनं कदापि नाश्रयंते॥५॥ असंत इति॥ संतोऽपि असंत इव परं
नरं कोपयंति। असंतः कोपासक्त्या परं क्रोधयंति। संतस्त्वंतरशीतला अपि तथा आचरंति। यथा परः क्रुध्यति। नहि काय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निजमिति। परिपाकभूतं फलीभूतं निजं कर्मपरीक्षितुं। अयमर्थः। कोपि तेऽन्यनरेण यथाऽसंतोवध्यंते तथाऽस्माकं बं
धो भवेदिति नवेत्ति स्वकर्मपरिक्षार्थी। तेषां तु बंधो न भवतीत्यर्थः॥ ६॥ ज्ञात्वेति। यथा रज्जुसर्पभ्रमानंतरं रज्जुज्ञाने जाते
पि सर्पोत्थं भयमनुवर्त्तत एव। एवं ब्रह्मज्ञानेन नाशितनिखिलमोहोप्यात्मनि मोहकार्यं कामक्रोधलोभादिकं न मुंचति॥ ७
॥ एवं तर्हि ब्रह्मणोपि कर्मबंधः प्रसक्त इत्यत आह॥ स्फटिक इति। यथा निर्मलः स्फटिको जपाकुसुमादीनां प्रतिबिंबेपि व

निजं कर्म गुणोदारं परिपाकं परीक्षितुं ६ ज्ञात्वाप्यसर्पं सर्पोत्थं यथा कंपं न मुंचति विध्वस्ताऽखि
लमोहोपि मोहकार्यं तथात्मनि ७ स्फटिकः प्रतिबिंबेन यथा नायाति रंजनं तत्त्वज्ञः कर्मफले
नांतस्तथा नायाति रंजनं ८ अंतर्मुखतया तिष्ठन् बहिर्वृत्तिपरोपि सन् परिश्रांततया नित्यं नि
द्रालुरिव लक्ष्यते ९ अद्वैते स्थैर्यमायाते चित्ते च प्रशमं गते योगिनः कर्म कुर्वंति पश्यंतः स्वप्नवज्ज
गत् १०

स्तु तो रंजनं नायाति रक्तो न भवति॥ तद्वत्तज्ज्ञानी कर्म कुर्वन् दृश्यमानोपि कर्मणा न बाध्यते॥ ८॥ अंतरिति। ब
हिरिंद्रियैर्विषयग्रहणं कुर्वन्नपि ज्ञानी अंतर्मुखतया आत्मतया तिष्ठन् निद्रायुक्त इव लक्ष्यते। यतः संसारतापात् श्रांतो
निवृत्तः॥ ९॥ अद्वैत इति। चित्ते शांतिं गते सति। अत एव ब्रह्मणि स्थिरतामागतेपि। योगिनो जगत् स्वप्नवत् पश्यंतः संतः कर्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अद्यैवेति। अद्यैवमरणमस्तु। कल्पांतपर्यंतंवाजीवतु। तथापिज्ञानीबंधंनाप्नोति। यथासुवर्णं कर्दमेक्षिप्तमपिकलंकं नाप्नोतितद्वत् ११ तनुमिति। ज्ञानीधीरपुरुषःकाश्यांतनुंदेहंत्यजतु। चांडालागारेपिच। तथापिमुक्तएव। यतोज्ञानप्राप्ति समयेएवविगतचित्तोभिन्नलिंगोजातस्ततोमुक्तइत्यर्थः॥१२॥ गोःपदमिति। नैराश्येनालंकृताशोभिता आकृतिर्यस्य तस्यवित्तज्ञस्यपुंसःपृथिवीगोःपदसमायाभवति मेरुःस्तंभप्रायःनभःमुद्रिकावच्छिन्नाकाशप्रायंत्रिभुवनंतृणमा

अद्यैवमरणंवास्तुकल्पांतेनिचयेनवा नज्ञःकलंकंनाप्नोतिहेमपंकगतंयथा ११ तनुंत्यजतु
वाकाश्यांश्वपचस्यगृहेथवा ज्ञानसंप्राप्तिसमयेमुक्तोसौविगताशयः १२ गोःपदंपृथिवीमेरुः
स्थाणुराकाशमुद्रिका तृणंत्रिभुवनंधाम्नैराश्यालंकृताकृतेः १३ अंतःशून्योबहिःशून्यःशू
न्यकुंभइवांबरे अंतःपूर्णोबहिःपूर्णःपूर्णकुंभइवार्णवे १४ ईप्सितानीप्सितौनस्तोयस्यांतर्वस्तु
(षु)दृष्टिषु॥

यंकिंबहुनासर्वथावित्तज्ञःश्रेयानित्यर्थः॥१३॥ अंतरिति। ज्ञानीधीरःअंतर्बहिरपिशून्यप्रायः। शू न्यकुंभवत्। अंतर्बहिःपूर्णोपिअर्णवेजलपूर्णकुंभवत्। तदात्मनैवसर्वत्रपूर्णत्वादित्यर्थः॥१४॥ ईप्सितेति। यस्यपुं सःपदार्थदर्शनेषुअयंमेइष्टोऽयमनिष्टइतिनभवति। अतएवसुषुप्तइवप्रवर्तते। सुप्तस्ययथाऽभिलाषाऽनभिला

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

 भावस्तथा यस्य प्रियाप्रियाभावः समुक्त एवेत्यर्थः ॥१५॥ निर्ग्रंथिरिति। जीवन्मुक्त ईदृशो भवति। निर्ग्रंथिः गलिताहंकारो
गतसंदेहः। स्वभावतः अनिर्वाणः ब्रह्मणोंतर्भासमानत्वात्। परंतु लोकदृष्ट्या चित्रदीपइव प्रशांतः सन् स्थितः ॥१६॥ अहं
कारेति। सजीवन्मुक्तः। योऽहंकारोन्यन्नांवासनांलीलयैव अनायासेनत्यक्त्वा ध्येयमपिसंत्यज्यस्वरूपभूतस्तिष्ठति॥
१७॥ दूरेति। सपुमानिहलोकेपि मंगलंकल्याणं मोक्षमाप्नोति॥सक्तः॥ यः सुहृदंसंधमिवदूरेत्यजति। यश्चसर्पोदिवत्

सुसद्दवप्रवर्त्तेतसमुक्तइतिकथ्यते १५ निर्ग्रंथिः शांतसंदेहोजीवन्मुक्तःस्वभावतः अनिर्वाणो
पिनिर्वाणश्चित्रदीपइवस्थितः १६ अहंकारमयींत्यक्त्वावासनांलीलयैवयः त्यजतिध्येयसंत्या
गीजीवन्मुक्तःसउच्यते १७ दूरेमुंचतिसंबंधुमंधमिवयःसंगाद्भुजंगादिवत्रासंयोविद्धाति वेत्ति
सदृशंभोगंरोगंचयः॥स्त्रैणंयस्तृणवत्घृणांप्रकुरुते मित्रेष्वमित्रेष्वपि तुल्यंतंयस्यसमंससमंगल
मिहाप्नोत्यपिमन्येश्नुते ॥१८॥ हृदयात्संपरित्यज्यसर्वेदंयंप्रशांतधीः ॥ जनसंगाच्चस्पति। यश्चरोगंभो
गंचतुल्यंजानाति। यश्चस्त्रीसमूहे कुत्सितत्तृणवज्जुगुप्सांकुरुते। यस्यच चित्तंशत्रौमित्रेचसमं॥ ईदृशो जीवन्मु
क्तोभवतीत्यर्थः॥१८॥ हृदयादिति। योहृदयंप्रपंचंमनसः सकाशात् दूरंत्यक्त्वा आकाशवत् निर्मलतरः सन्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अव्यग्रो भवति स परमेश्वरतुल्यवन्मुक्त एव ॥१९॥ समाधिमिति। यश्चित्तेन त्यक्तात्सः स ध्यानं करोतु संसारकर्माणि वा क
रोतु। मा करोतु वा। सर्वथाऽयमाशयत्वान्मुक्त एव। सर्वथान्तःस्थात्यागे मुक्तिरित्यर्थः॥२०॥ अनात्मनीति। देहादावात्म
बुद्धिर्नाम बंधस्तत्क्षयाऽ नात्मबुद्धिः स एव मोक्षः। वस्तुत आत्मनो बंधमोक्षाभाव एव। नित्यमुक्तत्वात्। अद्वितीयब्रह्म
त्वादित्यर्थः॥२१॥ दृश्यमिति। कालत्रयेपि भ्रमसंजरादृश्यं नास्त्येवेति ज्ञानेन मनसः सकाशात् यद्दिदृश्यनिराकरणं ज्ञा

व्योमसौम्यतरो व्यग्रः समुक्तः परमेश्वरः १९ समाधिमथ कर्माणि मा करोतु करोतु वा हृदयेनास्तिस
र्वांशो मुक्त एवोत्तमाशयः २० अनात्मन्यात्मधीर्बंधस्तन्नाशो मोक्ष उच्यते बंधमोक्षौ न विद्येते नित्य
मुक्तस्य चात्मनः २१ दृश्यं नास्तीति बोधेन मनसो दृश्यमानसं संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृ
तिः २२ न मोक्षो नभसः पृष्ठे पाताले न च भूतले सर्वाशासंक्षये चेतःक्षयो मोक्ष इतीष्यते २३ अनंते चि
द्घनानंदे निर्विकल्पैकरूपिणि स्थिते द्वितीयस्याभावात्को बंधो मोक्ष एव वा २४ ॥ तं तदा मोक्षसुखमेवेति ज्ञे

यं॥२२॥ न मोक्ष इति। मोक्षो नामकश्चित्पदार्थः। आकाशे नैव पाताले वा भूमौ वा किं बहुना स्वभावाद्व्यवहितदेशवर्ती नास्ति
किंतु सर्वपदार्थविषयकतृष्णानाशे सति या चित्तशांतिः स एव मोक्ष इत्यर्थः॥२३॥ अनंत इति। चिदानंदैकरूपे अविनाशि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनइति। मनएवउल्लसन्मात्रेणबंधभावंप्राप्तंयतः।अतस्तस्यैवहेराम यत्प्रशमनंसएवमोक्षः॥२५॥इतिवासिष्ठसारेतृतीयप्रकरणं॥रसायनमयीगीतापरमानंददायिनी॥नानंदयतिकंनामसाधुसंगतिचंद्रिका॥एषइत्यादिना।इदानींमनोलयंवर्णयति।स्वयमेवअम्लानाअखंडितायाचेतनाअंतःकरणंसएवआत्मनोमनःसंज्ञकंभूत्वास्वयमितस्ततोधावति किंकृत्वा।नानाविधमिष्टानिष्टंसंकल्प्य।तस्मात्संकल्पत्यागएवश्रेयानित्यर्थः॥१॥एतस्मादिति।सर्वव्यापिनोजगत्क्रीडा

मनएवोल्लसन्मात्रंबद्धतामगमद्यतः मनःप्रशमनोराम मोक्षएवावशिष्यते २५॥इतिश्रीवासिष्ठसारविवरणेतृतीयप्रकरणं॥वसिष्ठउवाच॥एषस्वभावाभिमतंस्वतःसंकल्प्य धावति चेतना स्वयमम्लानासैवेह मनआत्मनः॥१॥रसायनमयीगीतापरमानंददायिनी नानंदयतिकंनामसाधुसंगतिचंद्रिका॥ एतस्मात्सर्वगाद्देवात्सर्वशक्तेर्महात्मनः विभागकल्पनाशक्तिर्लहरीवोत्थिताम्भसः ॥२॥अतःसंकल्पसिद्धेयंसंकल्पेनैववशाम्यति॥

रूपवतोखिलसामर्थ्यान्महाभागादेतस्मात्परमेश्वराद्विश्वविभागरचनारूपाशक्तिरुत्थिता।यथाजलात्कल्लोलउदेतितद्वदित्यर्थः॥२॥अतइति।यतोयद्वस्तुयेननिमित्तेनउत्पद्यतेतेनैवतन्नश्यतीति।इत्थंवह्निज्वालादौ।यथावह्निज्वालावायुनाउत्पद्यतेतेनैववशाम्यति॥ ९॥ ९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अतोहेतोरियंसंसारपरंपरासंकल्पेनैवसिद्धासंकल्पेनैवनश्यति। धनविषयसंकल्पाज्ज्ञाताब्रह्मविषयसंकल्पा न्नश्यतीत्यर्थः॥३॥ मनइति। अमुनासंकल्पेनैवाभ्युदितंमनः मनाक्स्वल्पमपिअनवेक्षणात्। अविचाराद्दुरितं। अतएवस्वस्यैवस्वप्नेमरणाकारं यथास्वप्नेस्वप्नमरणं रथा। एवंमनोपितदेवेप्रेक्ष्यमाणंसत् नास्तियथास्वप्नमरणं॥४॥ असम्यगिति। अनात्मनिदेहादौयदात्मभावनंआत्मबुद्धिःतदसम्यग्दर्शनंमिथ्याज्ञानं। अवस्तुभूतेसं

येनैवजायतेतेनवह्निज्वालेववायुना ३ मनोमुनैवाभ्युदितंमनागेवानवेक्षणात् स्वस्वप्नम
रणाकारंप्रेक्ष्यमाणंनविद्यते ४ असम्यग्दर्शनंयत्स्यादनात्मन्यात्मभावनं यदवस्तुनिवस्तुत्व
तन्मनोविद्धिराघव ५ अयंसोहमिदंतन्मे एतावन्मात्रकंमनः तदभावेनमात्रेणविचारेणविली
यते ६ उपादेयानुपतनंहेयैकान्तविवर्जनं यदेतन्मनसोरूपंतद्बाह्यंविद्धिनेतरं ७ ॥ ६ ॥

सारेयावस्तुबुद्धिः हेराघवतन्मनोजानीहि ५ अयमिति। आत्मायंदेहरूपोयः सोहं इदं धनादिकंममेत्येतावन्मिथ्याभूतज्ञानात्मकंमनः इदंसर्वंनास्ति। एतावद्विचारमात्रेणविलीयते ६ उपादेयेति। उपादेयस्यविषयादेर्यदनुपतनमनुसरणंग्रहणमितियावत्। हेयस्यसर्पादेर्विवर्जनंत्यागः तन्मनसोरूपं। इदंग्राह्यमिदंनेत्यता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो०वा० ॥मनदूति॥संसारस्यकारणंमनएव। अतएवमनःपुरुषः मनसाकृतंतदेवकृतमितिहेयं निर्वासनेनमनसाशरीरकृ प्र०
स० तंनलगति॥मनोनिबंधनत्वात्पापपुण्ययोरित्यर्थः॥८॥चित्तमिति। पदार्थानांकारणीभूतंचित्तमेव। चित्तेविद्यमा ४
११ नेजगत्त्रयंविद्यतएव। निर्वासनेमनसिजगन्नास्त्येव। तस्मान्मनसएवप्रयत्नेनचिकित्साकर्त्तव्या॥९॥रामेति॥
हेरामवासनायांसत्यांबंधः। निर्वासनेमनसिमोक्षः। तस्माद्विवेकेनमनसिवासनांनिराकुरु॥१०॥यथेति॥न

मनोहिजगतांकर्तृमनोहिपुरुषःस्मृतः। मनःकृतंकृतंलोकेनशरीरकृतंकृतं। येनैवालिंगिता
कांतातेनैवालिंगितासुता ८ चित्तंकारणमर्थानांतस्मिन्सतिजगत्त्रयं। तस्मिन्क्षीणेजगत्क्षी
णंतच्चिकित्स्यंप्रयत्नतः ९ रामवासनयाबद्धंमुक्तंनिर्वासनंमनः। तस्मान्निर्वासनीभावमाह
राशुविवेकतः १० यथाभ्रलेखाशशिनंसुधालिप्तंमषीयथा दूषयत्येवमेवांतर्नैराश्यापिशा
चिका ११ अंतर्मुखतयासर्वंचिद्वह्नौत्रिजगत्तृणं जुहृतोंतर्निवर्त्तंतेरामचित्तादिविभ्रमः १२॥

शायाएववासनारूपत्वात्तांनिंदति। हेरामआशारूपिणीपिशाचिकाराक्षसीनरंजीवंदूषयति। संसारंनयति। निर्म राम
लस्यदूषणेदृष्टांतद्वयं॥यथाऽभ्रलेखाचंद्रंमलिनयति॥मषीयथाचसौधं॥११॥अंतरिति। संसारादौद्विपाणिप्र ११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानाग्नेोज्ञहूतोनरस्यचित्तादिः सर्वोभ्रमः स्वयमेवनिवर्त्तते ॥ नतत्ररथ्यारथ्ययोगाअथरथ्यानयोगानसृजत इतिश्रुतेः १२ यदेति। चित्तनाशोपायमुपदिशति। यदाहेयोपादेयपदार्थान्मिथ्याभूतान्ज्ञात्वाकिंचिन्नस्म येतेनतदास्वत एव चित्तं विलीयतइत्यर्थः १३ घोरमिति। जाग्रदवस्थायांतुचित्तं घोरंपरमदुःसहं। स्वप्नाव स्थायांमूढंतिष्ठति। सुषुप्त्यवस्थायांशांतंतिष्ठति॥ तुरीयावस्थायांनश्यति ॥ नदर्थंतुरीयंभावनीयं ॥१४॥

यदानभाव्यतेकिंचिद्धेयोपादेयरूपवित् स्थीयतेसकलंत्यक्त्वातदाचित्तंनजायते १३
घोरंजाग्रन्मयंचित्तंमूढंस्वप्नमयंस्थितं शांतसुषुप्तिभावस्थंत्रिभिर्हीनंमृतंभवेत् १४ वि
लाप्यपंकंकतकरजोयद्वद्विलयंनयेत् यथात्मनितथाविद्धिविलाप्यविलयंमनः १५ चि
त्तंजानीहिसंसारंबंधश्चित्तमुदाहृतं पादपःपवनेनेवदेहश्चित्तेनचाल्यते॥१६॥ विलाप्येति। यथा।

जलेवर्त्तमानंरजःकतकफलंविलाप्यपंकाभावंनयति॥ जलंचशुद्धंकरोति। तथामनोपिआत्मनिविलाप्यवि लयंनाशंनयेत्।आत्मानंशुद्धंचकुर्यात् १५ चित्तमिति। हेरामसंसारंचित्तमेवजानीहि॥ चित्तमेवबंधः। देहो पिचित्तेनैवेतस्ततोभ्रमति। यथावायुनाबाष्पभावेस्थिरोवृक्षस्तद्वत्॥१६॥ ॥ ॥ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा ॥ हस्तमिति ॥ ॥ ॥ध्यानवार्त्तादीन् सर्वाननवयवान् स्थिरीकृत्य एकांतमुपविश्यप्र सु·
सा· श्रमं मनोजयं कुर्यात् ॥मुक्तिसाधनानां मनोजयस्य प्राधान्यादित्यर्थः १७ चित्तमिति। यः पुनर्ध्यानवार्त्तामेव व ४
१२ दन् सन् स्वतंत्रप्रवर्त्तमानशीलं एकं चित्तं जेतुं शक्नोति। स मूढो न लज्जते कथं ॥ चित्तजये असमर्थो ध्यानवा
र्त्तां वदन् मूढ इत्यर्थः १८ एक इति। मनोलक्षणो देव एवं विजितः सर्वार्थसिद्धिदो भवति। यतस्तस्मान्मनसो ज

हस्तं हस्तेन संपीड्य दंतैर्दंतान्विपीडयन् अंगान्यंगैः समाक्रम्य जयेदादौ स्वकं मनः १७
चित्तमेकं न शक्नोति जेतुं स्वायत्तमत्र यः ध्यानवार्त्तां वदन्मूढः स किं लोके न लज्जते १८
एक एव मनोदेवो जेयः सर्वार्थसिद्धिदः अनेन विफलक्लेशः सर्वेषां तज्जयं विना १९ अनु
द्वेगः श्रियो मूलमनुद्वेगात्समुच्यते जेता मनोजया दन्यस्त्रैलोक्यविजयस्तृणं २० सत्संगो
वासनात्यागः आत्मविद्याविचारणं॥ राम १२

यं विना साधनांतरक्लेशो व्यर्थ एवेत्यर्थः १९ अनुद्वेग इति॥
दुःखेषु वस्तुनि अप्राप्तेषु उद्वेगाभावः स एव मोक्षलक्ष्म्याः कारणं न अन्यत्। अत एव मनोजयं विना अन्यपदार्थ
जयेप्रयत्नो मिथ्येत्यर्थः २० तज्जये साधनमाह ॥ सत्संग इति। मनसो जये चत्वार उपायाः॥ एकः सतां संगः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्स्त्रान्यागः। ब्रह्मविद्यायावेदांतशास्त्रस्यविचारः। प्राणायामश्चेति। अतश्चतुरउपायान् कुर्वतोऽल्पकालेनमनसोजयोभवति॥२१॥ मनसोजयस्यफलमाह॥ पूर्णेति। जितेमनसिसर्वैसुधारसैः पूर्णभाति। तत्रदृष्टांतः सोपानश्चरणस्ययथासर्वाभूमिश्चर्मावृतेवभाति तद्वत्॥२२॥ नाहमिति। अहंसंसारीतिभावनयामनसोबंधः॥ अहंब्रह्मेतिभावनयामनसोमुक्तिरित्यर्थः॥२३॥ चित्तइति। मनसिजितेसतिसंसारोन

प्राणस्पंदनिरोधाच्चेत्युपायाश्चेतसोजये २१ पूर्णेमनसिसंपूर्णंजगत्सर्वैसुधाद्रवैः उपानद्गूढपादस्यननुचर्मावृतेवभूः २२ नाहंब्रह्मेतिसंकल्पात्सुदृढंबध्यतेमनः सर्वंब्रह्मेतिसंकल्पात्सुदृढंमुच्यतेमनः २३ चित्तेत्यक्तेलयंयातिद्वैतमैक्यंचसर्वतः शिष्यतेतत्परंब्रह्मशांतंनित्यमनामयं २४ चिन्मात्रत्वंप्रयानस्यतीर्णमृत्योःसचेतसः योभवेत्परमानंदःकेनासावुपमीयते २५॥

भासते। एकंसजातीयविजातीयस्वगतभेदरहितं॥ अविनाशिव्यापकंपूर्णंब्रह्मैवसर्वतोभाति॥२४॥ चिदिति। ब्रह्मभावगतस्यजरामरणरहितसज्ज्ञानिनोयःपरमानंदोभवेत्। तस्योपमानास्ति॥ सतेनैवानुभवितान्येयानान्येनाब्रह्मसज्ज्ञानेनेत्यर्थः॥२५॥ ९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· ॥इतिश्रीयोगवासिष्ठसारटीकायांमनोलयाख्यंचतुर्थंप्रकरणं॥इदानींवासनोपशमः कथ्यते॥हेरामअहं प्र·
सा· कः इतिईदृशोयःस्वात्मविचारः।सएवचित्तलक्षणस्यदुष्टद्रुमस्यदुःखप्रापकरुक्षस्ययद्वीजंवासनात्मकं ५
१३ तस्यदाहार्थंवैश्वानरोज्ञेयः॥आत्मविचारमंतरावासनानक्षीयेतेतदत्यर्थः॥१॥विचारेति।आधयोमनःपी
डाःविचारलक्षणेमुकुरेलग्नाअतएवधैर्यभारंप्राप्तांबुद्धिंनबाधंते।तत्रदृष्टांतः।यथाअलेख्येवर्त्तमानांल

॥इतिश्रीयोगवासिष्ठसारेमनोलयाख्यंचतुर्थंप्रकरणं॥ वसिष्ठउवाच॥ रामस्वात्मवि
चारोयंकोहंस्यामितिरूपकः चित्तदुर्द्रुमबीजस्यदहनेदहनःस्मृतः १ विचारदर्पणेलग्नां
धियंधैर्यधुरंगतां आधयोननिलुंपंतिवाताश्चित्रलतामिव २ विचारोऽध्यात्मविद्यानांज्ञा
नंतत्वविदोविदुः ज्ञेयंतस्यांतरेवास्तिमाधुर्यंपयसोयथा ३ विचारेणपरिज्ञातःस्वभावस्यो
दितात्मनः अनुकंप्याभवंतीहब्रह्मविष्णुशिवादयः ४॥ तांवाताःनबाधंते।२।विचारइति।ब्रह्मवि राम
द्यानांयोविचारस्तमेवज्ञानंबुधाःजानंति।ज्ञेयंब्रह्म।ज्ञानमध्येएवास्ति।यथादुग्धमध्येमाधुर्यमस्तितद्व १३
त्॥३॥विचारेणेति।आत्मविचारेणपरिज्ञातःस्वस्यब्रह्मणोभावःसत्तायेनईदृशस्यअतएवउदितात्मनः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकाशीभूतब्रह्मसाक्षात्कारस्य तस्य ब्रह्मादयोपि देवा अनुकंप्या भवंति ॥ कस्मात् ब्रह्मज्ञत्वात् ॥ ४ ॥ कि-
मिदमिति। किमिदं विश्वं किं अहं च कः इति निरंतरविचारशीलस्य पुंसः एतज्जगत् असदेव भवेत्। तन्न
भासते। असत्त्वादित्यर्थः ॥ ५ ॥ यस्येति। यस्य सर्वं खल्विदं ब्रह्मेति श्रुत्यर्थावगमान्मूढत्वं क्षीणं ॥ न स्य पु-
नर्वासनानोदेति। यथा मरौ निर्जले देशे विदुषो जलमतिर्न भवति ॥ ६ ॥ वासनेति। प्राणस्पंदनिरोध

किमिदं विश्वमखिलं किं स्यामहमिति स्वयं विचारनिरतस्यैतदसदेव भवेज्जगत् ५
यस्य मौर्ख्यं क्षयं यातं सर्वं ब्रह्मेति भावनात् नोदेति वासना तस्य प्राज्ञस्याम्बुमतिर्मरौ ६॥
वासनासंपरित्यागाच्चित्तं गच्छत्यचित्ततां प्राणस्पंदनिरोधाच्च यथेच्छसि तथा कुरु ७ सा-
धुसंगमसच्छास्त्रपरो भवसि सन्मते तद्दिनैरेव नो मासैः प्राप्नोषी मां परां धियं ८॥ नाद्वासनानाशः

॥ वासनानाशाच्च चित्तं स्वभावं प्राप्नोति। ब्रह्मैव भवतीत्यर्थः ॥ पश्चाच्चित्ते क्षीणे सति यथेच्छसि तथा कुरु क-
र्मणो बाधकत्वाभावादित्यर्थः ॥ ७ ॥ साध्विति। हे सन्मते विचारवति बुद्धे साधुसंगमब्रह्मविद्याशास्त्रपरायणो
यदि भवसि। तर्हि कतिपयैरेव दिनैर्ब्रह्मनिष्ठां बुद्धिं प्राप्नोषि। न मासाद्यपेक्षया ॥ ८ ॥ ॥ ६ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· सत्पुरुषसंगत्यानुभवव्यवहाराचारात्। संसारचिंतानिवर्त्तनेनशरीरस्यनश्वरत्वभावनाच्चवासनाक्षीय प्र·

सा· ते। वासनाक्षयेसाधनत्रयमित्यर्थः॥९॥दृढेति। दृढस्यभावस्यब्रह्मरूपानुसंधानात् मूर्खाअपिविष ५

१५ परिणामेदुःखदत्वाद्विषतुल्यसं सारंअमृतांनयंति। ब्रह्मरूपतांप्रापयंति। अमृतंअज्ञानदशायाममृत

वज्ञासमानंसंसारसुखंविषवदमृतांनयंति॥१०॥सत्येति। सत्यत्वेनदृष्टोऽयंदेहः। अलमत्यर्थंदेहोभव

सत्संगव्यवहारित्वाद्भवभावनवर्जनात्। शरीरनाशदर्शित्वाद्वासनानप्रवर्त्तते ९ दृढभा
वानुसंधानाद्धिमूढाअपिराघव विषंनयंत्यमृततामसमृतं विषतामपि १० सत्यभावेनदृष्टो
ऽयंदेहोदेहोभवत्यलं दृष्टस्त्वसत्यभावेनव्योमतांयातिदेहकः ११ सुखंतल्पगतोयेनस्व
प्नेदेहेनदिक्तटान् परिभ्रमसिहेरामसदेहस्तेक्कसांप्रतं १२॥ ॥ ॥ ॥ ॥

ति। देहउपचये अस्यधातोःप्रयोगः। उपचयकरोभवति। देहपरंपराकारःसंसारप्रापकोभवतीत्यर्थः। सएवदे

हः। असत्यत्वेनदृष्टःसन्शून्यतांयाति। नभासतेमोक्षंददाति॥११॥सुखेति। सतोदेहस्यासत्यत्वेदृष्टांतः। हे राम

रामत्वंस्वप्नावस्थायांशय्यायांवर्तमानोयेनदेहेनदिशांमंतान्भ्रमसि। सदेहोजाग्रदवस्थायांक्वयाति। स्वप्नवद् १५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो॰वा॰ ॥इतियोगवासिष्ठसारटीकायां पंचमं प्रकरणं॥ इदानीं मननं निरूपयति॥ शुद्ध इति। अहमिमं देहं अन्यशरी
सा॰ रवत्पश्यामि। देहोहं न भवामीत्यर्थः। किंभूतोहं शुद्धो गुणातीतः निरंजनः मायातीतः अनंतः शाश्वतः बोध
१५ ज्ञानरूपः। प्रकृतेर्मायाया अन्योपि। आभासिकदेहसंबंधाच्चेष्टमानः। व्यापारं कुर्वन् लोकदृष्ट्या॥१॥ एत
इति। यत एते मनोबुद्धींद्रियादयः॥ सर्वे भावाः असंतो विद्यमानाः संतोवधानं विना सावधानतामंतरेण

६ मनन

॥इतियोगवासिष्ठसारे वासनोपशमनंनाम पंचमं प्रकरणं॥ शुद्धो निरंजनोनंतो बोधोहं प्रकृ
तेः परः चेष्टमानइमं देहं पश्याम्यन्यशरीरवत्॥१॥ योब्रह्मभावमादिश्य भक्तानां स्थिरचे
तसां॥ आनंदरूपमाधत्ते तं नृसिंहं सदा नुमः॥ ॥एते हि चिद्विलासांता मनोबुद्धींद्रियाद
यः असंतः सर्व एवाहो अवधानं विना स्थिताः॥२॥ आपद्यचलचित्तोस्मि जगन्मित्रं च संपदि
भावाभावविहीनोस्मि तेन जीवाम्यनामयं॥३॥

स्थिताः भासंते। कीदृशाः चिद्विलासांताः। चिद्विलासो ब्र
ह्मानुभव एवांतो नाशो येषां ते। ब्रह्मसाक्षात्कारेण न भासंत इत्यर्थः॥२॥ आपदीति। यतोहमापदि दुःखाप
तौ अचलचित्तः स्थिरमना अस्मि संपन्नदशायां जगन्मित्रं विश्वोपकारकोस्मि। भावाभावौ उदयहानी तद्रहि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देहइति। अनेन मुमुक्षुणा सर्वनाशे प्राप्तेपि देहोहमितिबुद्धिर्देहात्ममतिः सर्वथात्याज्या। यथा साधुना स
हाचारेण कुक्कुरमांससहिता चांडालीन स्प्रष्टव्या १३ ब्रह्मेति। एकं ब्रह्मैव भावयन् गतदुःखो यदा शांतस्तिष्ठ
सि। तदा स्वयमेव देहात्मबुद्धिर्विलीयत इत्यर्थः १४ सर्वत्रेति। सर्वत्र आब्रह्मादिस्थावरांते संसारे एकं ब्रह्मै
व तत्तदाकारेण भासते। नान्यत्। इतिदृढभावनया अंतःशीतलः आनंदमग्नः सन् स्वस्थो भवति। तदाहंकार

देहोहमिति धीस्त्याज्या सर्वनाशेप्युपस्थिते स्प्रष्टव्या सा न भाव्येन सश्वमांसेव पुल्कशी १३
ब्रह्मैकं भावयन्साधुः शांतस्तिष्ठन्गतव्यथः ततस्ते सावहंभावः स्वयमेव विनश्यति १४ सर्व
त्रैक्यावबोधेन स्वस्थोन्तःशीतलः सदा निरहंकृतिराकाशविशदस्तेन संस्थितः १५ अंतः
शीतलतायां हि लब्धायां शीतलं जगत् अंतस्तापोपतप्तानां दावदाहमयं जगत् १६॥ नाशादा

काशवन्निर्मलो देहात्मबुद्धिरहितो भवति। ब्रह्मभावनां विना देहात्मबुद्धिर्न निवर्तत इत्यर्थः १५ अंत
रिति। ब्रह्मभावनया अंतःशीतलतायां लब्धायां जगदपि शीतलं भाति। अंतस्तृसयापरिभूतानां तु सर्वसं
सारोग्निवत् दाहक एव भासते। पित्तपीडितजिह्वायां शर्करायाशीतलत्वमपि यथा दाहकं तद्वदित्यर्थः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरीह इति। ईदृशोऽस्मि। कीदृशः निरीहः ईहा सांसारिकी चेष्टा सा निर्गता यस्य। निराशस्तृष्णारहितः स्ववत् स्वस्थो निर्मलः। निःस्पृहः विषयवासनास्पृहातद्रहितः शांतः स्थिरमनाः। अरूपः रूपग्रहणमन्येषामुपलक्षणं। रूपरसगंधस्पर्शशब्देष्वनासक्तः अत एव चिरायुरविनाशी। अचलः चांचल्यहीनः एवंविधः स्थितोऽस्मि॥ ४॥ चिदिति। अधुना मया सम्यक् समीचीनं विज्ञानं। किं पंचभूतानि पृथिव्यादीनि। चिदेव ब्रह्मैव। भुवनत्रयं पंच

निरीहोऽस्मि निराशोऽस्मि स्ववत् स्वस्थोऽस्मि निःस्पृहः शांतोऽस्म्यहमरूपोऽस्मि चिरायुरचलः स्थितः ४ चिदेव पंचभूतानि चिदेव भुवनत्रयं विज्ञानमधुना सम्यगहमेव चिदेव हि ५ सर्वातीतः सर्वगम्यः खमिवाहमहं स्थितः यत्तदस्मि तदेवास्मि वक्तुं शक्नोमि नेतरत् ६ मय्यनंतचिदंभोधावाश्चर्यं जीववीचयः।

भूतकार्यमपि चिदेव। अहमपि चिदेव। सर्वं खल्विदं ब्रह्मेति श्रुतेः॥ ६ ॥५॥ ६ ॥सर्वेति। अयं प्रत्यक्षोऽहं। सर्वातीतः सर्वभासमानं जगत्तस्मादतीतः। संसाररूपो नाहं। अतः सर्वगो व्यापकः। खमिव वियदिव स्थितः। वास्तवं न तत् ब्रह्म यदस्मि तदेवास्मि। ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति भगवद्वचनात्। तच्छब्देन ब्रह्म न तदहमस्मि। इतरत् ततो धिकं वक्तुं न शक्नोमि॥ ६॥ मयीति। इदं आश्च

ष्टा० २०

यत् अनंतचिदंभोधौ अपारज्ञानसमुद्रे मयि जीववीचयो जीवलक्षणा ऊर्मयः समुल्लसंति उत्पद्यंते। खेलंति
व्यापारं कुर्वंति। प्रविशंति पुनस्तत्रैव लीयंते। स्वभावतः। वीचीनामिव जीवानां स्वभावोयमित्यर्थः ७ मयीति
अनंतचिदंभोधौ अनंतज्ञानसमुद्रे मयि आत्मनि विश्ववीच्यादिकल्पनासंसाररूपलहरीकल्पना उदेतु। अ
थवास्तं नाशमायातु। विश्वरूपोर्मीणामुदये क्षये वा मे मम न वृद्धिर्न वा क्षयोस्ति। कस्मात्पूर्णत्वादित्यर्थः॥८॥

समुल्लसंति खेलंति प्रविशंति स्वभावतः ७ मय्यनंतचिदंभोधौ विश्ववीच्यादिकल्पना
उदेतु वास्तमायातु न मे वृद्धिर्न च क्षयः ८ मद्ज्ञानोदितं विश्वं मय्येव लयमागतं अपरो
क्षचिदानंदसाम्राज्यमधुनास्म्यहं ९ सर्वभूतांतरस्थाय नित्यमुक्तचिदात्मने॥ प्रत्यक्चै
तन्यरूपाय मह्यमेव नमो नमः १०॥

मदिति। ममात्मनः अज्ञानेन उदितं विश्वं मय्यात्मनि ज्ञाते सति ल
यं नाशं प्राप्तं अधुना अपरोक्षः प्रत्यक्षः यश्चिदानंदः स एव साम्राज्यं ऐश्वर्यं तद्रूपोहमस्मि ९ सर्वेति। एवंविधाय म
ह्यं ममात्मने एव नमो नमः॥ कथंभूताय सर्वभूतांतरस्थाय सर्वेषां भूतानामंतर्मध्ये अंतर्यामिरूपेण स्थिताय त
था नित्यमुक्तश्चासौ चिदात्मा ज्ञानरूप आत्मा तस्मै प्रत्यक्चैतन्यरूपाय। प्रतिदेहं अंचतीति प्रत्यङ्। अत एव चैतन्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ इतिश्रीयोगवासिष्ठसारे टीकायां षष्ठंप्रकरणं॥ आत्मनिरूपणमाह॥ बहिरिति। हेराघव। एवंविधःसन्लोकेविहरसंसारव्यापारंकुरु। कीदृशः। बहिः कृत्रिमः संरंभ उद्यमोयस्यसतथा। हृदिमनसिसंरंभेणोद्यमवर्जितः। अतएवलोकदृष्ट्याबहिरेवकर्त्ता। अंतर्हृदितुअकर्त्तादेहाभिमानाभावादित्यर्थः १ अंतरिति। हेराघवएवंविधोलोकेविहरव्यवहारंकुरु॥ किंभूतः अंतर्मनसिसंत्यक्ताः सर्वाआशास्तृष्णायेनसः। यतो

॥इतिश्रीयोगवासिष्ठसारेआत्ममननंनामषष्ठंप्रकरणं॥ वसिष्ठउवाच॥ बहिःकृत्रिमसंरंभोहृदिसंरंभवर्जितः कर्त्ताबहिरकर्त्तांतर्लोकेविहरराघव १ अंतःसंत्यक्तसर्वाशोवीतरागोविवासनः बहिःसर्वसमाचारोलोकेविहरराघव २ पूर्णांदृष्टिमवष्टभ्यध्येयत्यागविलासिनीं जीवन्मुक्ततयास्वस्थोलोकेविहरराघव॥ ३॥ वीतरागोविषयाभिलाषरहितः

अतएवविवासनःसर्ववासनाशून्यः। तथाबहिरेवसर्वैसमाचाराआरंभायस्यसतथा॥ २॥ पूर्णामिति। ध्येयोयःसंसारस्तस्यत्यागेनविलासति शोभतेसाध्येयत्यागविलासिनी। तामेवंविधांपूर्णांदृष्टिंअवष्टभ्यावलंब्यजीवन्मुक्ततयाजीवन्मुक्तभावेनस्वस्थः सन्हेराघवलोकेतिष्ठलोकवद्व्यापारंकुरु॥ ३॥ ९ ॥ ६ ॥ ९ ॥ १

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो॰वा॰ एकइति। अहमेको नान्यः। सजातीयविजातीयस्वगतभेदरहितः अतएवविशुद्धबोधः सत्यज्ञानइत्येवंविधेननिश्चय प॰७

सा॰ वह्निनासिद्धांतरूपपावकेनद्वैतगहनं भेदकाननं। द्वैतमहमन्योन्यएषइतिकृत्यादिभेदज्ञानंतदेवगहनंप्रज्वाल्य

९७ दग्ध्वाएकःसन्सुखीभव। सुखरूपःस्याः ४ देहइति। अहंदेहःइतियोमानोदेहाभिमानःसएवपाशःबंधकत्वात्

तेनत्वंसर्वतोबद्धोसि। तर्हिकिंकार्यमतआह। अहंबोधोज्ञानरूपइतिमानःसएवखड्गस्तेनतंदेहाभिमानपाशं।

एकोविशुद्धबोधोहमितिनिश्चयवह्निना प्रज्वाल्याद्वैतगहनमेकएवसुखीभव ४ देहोहंमा

नपाशेनहंदबद्धोसिसर्वतः बोधोहंज्ञाननखड्गेनतंनिकृत्यसुखीभव ५ अनात्मनिरतिंत्य

क्त्वानिर्विभागोजगत्स्थितौ एकनिष्ठतयांतस्थःसच्चिन्मात्रपरोभव ६ अजाग्रत्स्वप्ननिद्रस्य॰ ॥ यत्तेरूपंसना

निकृत्यविच्छित्यसुखीभवआनंदरूपोभवइत्यर्थः ५ अनात्मनीति। हेराघवईदृशोभव। किंभू

तः निर्विभागःजगत्स्थितौ। जनस्थित्यांजगत्स्थिरताजगज्जातेर्विभागःविभजनंतद्रहितःजगद्रूपभेदकल्पनाही

नः। एकनिष्ठतयाएकस्मिन्आत्मन्येवनिश्चलतयाअंतस्थःबहिरिंद्रियव्यापारहीनः। अतएवसच्चिन्मात्रपरःसत्नित्यं

चित्ज्ञानरूपं। परब्रह्मतत्परःतदेकभूतः। किंकृत्वेदृशोभवामीतिचेतच्छृणु। अनात्मनिदेहादौरतिंत्यक्त्वा। देहाद्यनासक्तिंविना राम ९७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अजाग्रत्स्वप्ननिद्रस्य निद्रासुषुप्तिः जाग्रत्स्वप्नसुषुप्त्यवस्थारहितस्य तुरीयस्यैनेतव विशुद्धस्य यद्रूपं तन्मयः सर्वदा भव। कथंभूतं रूपं सनातनं॥ नित्यं। सचेतनं ज्ञानरूपं। विशुद्धं निरंजनं। ब्रह्मरूपो भवेत्यर्थः ७ माभवेति। ग्राह्यभावात्मा ग्राह्यत्वस्वरूपो माभव ग्राहकात्मा गृहीतृस्वरूपोपि माभव। किं तर्हि अखिलाःसमग्रा भावना ग्राह्यग्राहकत्वादिरूपां त्यक्त्वा यन्मयोसि तन्मयो ब्रह्मीभूतो भव ८ संकल्पेनेति। हे मुने मननशील राघव संकल्पजिद्य:

सचेतनं विशुद्धं च तन्मयो भव सर्वदा ७ माभव ग्राह्यभावात्मा ग्राहकात्मा च माभव भावना:
मखिलां त्यक्त्वा यन्मयस्तन्मयो भव ८ संकल्पेनैव संकल्पं मनसैव मनो मुने छित्वा स्वा
त्मनि निष्ठ त्वं किमेतावति दुष्करं ९ कस्तवायं जडो मूको देहो भवति राघव यदर्थं सुखदुःखाभ्या
मवशः परिभूयसे १० काष्ठमांसरुधिरास्थि निर्मितं स्वं चैतन्यविग्रहः ११ ज्ञादिरूपेणैव संकल्पेन न कुर्यात तत्

हि किं विधेयं मनसैव निर्वासनेन मनः संकल्पात्मकं छित्वा निःसंकल्पं विधाय आत्मनि स्वस्वरूपे तिष्ठ एतावति संकल्पवर्जनमात्रे किं दुष्करं अनायाससाध्यमित्यर्थः ९ कइति। हे राघव जडोऽचेतनो मूको निरिंद्रियो देहस्तव कः। न तव देहेन कश्चित्संबंध इत्यर्थः॥ यदर्थं यस्य देहस्यार्थे अवशः परवशः सन् त्वं सुखदुःखाभ्यां परिभू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो॰ वा॰ मांसरुधिरादीनि देहस्थानि क्व चैतन्यविषयो ज्ञानरूपस्त्वं क्व एवं जानन्नपि अस्मिन्देहे आत्मबुद्धिं किं न जहा
सा॰ सि न त्यजसि ११ एतावतैवेति। एतावतैव एतावन्मात्रेण परमात्मा अवगम्यते। अयं देहो यत्काष्ठलोष्ठसमत्वे
१८ न काष्ठतृणतुल्यत्वेनावगम्यते देहस्य यच्च तृणकाष्ठतुल्यत्वं ज्ञानं तदेव परमज्ञानमित्यर्थः १२ अहो न्विति। अ
हो इत्याश्चर्ये नु इति विचारे इदं चित्रं अद्भुतं किं यत्सत्यं ब्रह्म तत् नृणां विस्मृतं यद् अविद्यासंज्ञकमसत्यं तत्पुरोग्रे प

विजानन्नपि देहेस्मिन्नात्मधीं न जिहासि किं ११ एताव तैव देवेशः परमात्मैवगम्यते का
ष्ठलोष्ठसमत्वेन देहो यमवगम्यते १२ अहो नु चित्रं यत्सत्यं ब्रह्म तद्विस्मृतं नृणां यदसत्यमवि
द्याख्यं तत्पुरः परिवल्गति १३ अन्यच्चित्रं यत्परं ब्रह्म तद्विस्मृतं नृणां यन्ममेदमविद्याख्यात
त्पुरः प्रबलायते १४ सर्वं ब्रह्मेति यस्यांतर्भावना सा विमुक्तिदा भेदबुद्धिरविद्येयं सर्वथा तां परि
त्यज १५ ॥ ९ ॥ ६ ॥ ॐ ॥

रिवल्गति विस्फुरति। स्वं ब्रह्मस्वरूपं विस्मृत्य देहात्ममत्तयो जना
इति चित्रमित्यर्थः ॥१३॥ अन्यदिति। अन्यदपि चित्रं यत्परं ब्रह्म तत् नृणां विस्मृतं। यत् ममेदमित्यहंकारममका
रास्पदं तत्पुरोग्रे प्रबलायते प्रबलं प्रबलवत् भवति १४ सर्वमिति। यस्यांतश्चित्ते सर्वं ब्रह्मेति भावनावासना सा विमु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥इतिश्रीयोगवासिष्ठसारविवरणेशुद्धिनिरूपणटीकायांसप्तमंप्रकरणंसमाप्तं॥ आत्मनिरूपणायाह॥ यदीति देहं शरीरंपृथक्कृत्यदूरेकृत्वा चितिचैतन्येविश्रम्यपरित्वंतिष्ठसि। यद्वाहेरामयदित्वंदेहंपृथक्कृत्यदेहादिभ्योविविच्य। चितिविश्रम्यचिरैकाग्रोभूत्वातिष्ठसि। तदातूष्णीकृताशेषः तूष्णीकृतमशेषंविश्वंयेनेदृशः सन्स्वयमेकोब्रह्मभविष्यसि। तत्र दृष्टांतमाह। अष्टावक्रे। यदिदेहंपृथक्कृत्यचितिविश्रम्यतिष्ठसि॥ अधुनैवसुखीशांताबंधमुक्तोभविष्यसि एवमेवे

॥इतिश्रीयोगवासिष्ठसारविवरणेशुद्धिनिरूपणंनाम—सप्तमंप्रकरणंसमाप्तं॥ वसिष्ठउवाच
यदिदेहंपृथक्कृत्यचितिविश्रम्यतिष्ठसि तदातूष्णीकृताशेषःस्वयमेकोभविष्यसि १ येनेदंवेत्सितज्ज्ञात्वाकुरुप्रत्यङ्मुखंमनः ततःप्रकाशरूपत्वंद्रक्ष्यसिस्फुटमात्मनः २ येनशब्दंरसंरूपं गंधंजानासिराघव तमात्मानंपरंब्रह्मजानीहिपरमेश्वरं ३ यत्रभावाहिस्पंदंते निमीयंतेचयेन

त्यर्थः १ येनेदमिति। येनात्मनाइदंजगद्वेत्सिजानासितज्ज्ञात्वामनःप्रत्यङ्मुखमात्माभिमुखंकुरु। ततआत्माभिमुखमनसाआत्मनःप्रकाशरूपत्वंस्फुटंद्रक्ष्यसि २ येनेतिहेराघवयेनात्मनाशब्दस्पर्शरूपरसगंधान्त्वंजानासि। तमात्मानंजीवंपरमेश्वरंनियंतारंपरंब्रह्मजानीहि ३ यत्रेति। यत्रात्मनिभावाःपृथिव्यादयःपदार्थाःस्पंदंतेचेष्टंते। येनात्मनानिर्मीयं

यो० सा० टी०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· तमेवात्मानंस्वरूपंपरमेश्वरं नियंतारंपरंब्रह्मजानीहि ४ यदिति। यत्तत्यत्तद्दृश्यंतत्त्वमिति ज्ञेयंजगत्संबंधितत्प्रयुक्ति मु·
सा· भिन्नोयेनेतिसंत्यज्य॥त्यागेक्रियमाणेयदवशिष्टंसर्वावधिभूतंचिन्मात्रं। निरवधेर्निषेधस्यासंभवात्। ततस्त ८
१९ द्रूपंप्राप्यसोहमस्मीतिपुनःपुनर्भावयचिंतय ५ ज्ञानमिति। ज्ञानंभवतःसकाशात्भिन्नंन। अतोज्ञेयंचज्ञानात्पृथ
क्नहि। अतएवज्ञातृत्वात्ब्रह्मभिन्नंकिंचिन्नास्ति। तस्माद्भेदोद्वैतंनविद्यते ६ ब्रह्मेति। ब्रह्मविष्णुशिवेंद्राद्यादेवाःस

तमेवात्मानमात्मानंरूपंजानीहिराघव ४ यद्दृश्यमिदंतत्त्वंनेतिसंत्यज्ययुक्तिभिः प्रा
प्यावशिष्टंचिन्मात्रंसोहमस्मीतिभावय ५ ज्ञानंनभवतोभिन्नंज्ञेयंज्ञानात्पृथङ्नहि अतो
नात्मेतरंकिंचित्तस्माद्भेदोनविद्यते ६ ब्रह्मविष्णुशिवेंद्राद्यायद्यत्कुर्वंतिसर्वतः तदहंचिद्वपुः
सर्वंकरोमीत्येवभावय ७ अहंसर्वमिदंविश्वंपरमात्माहमव्ययः नभूतंनास्तिनोभाविमत्तोन्य
दितिभावय ८ एकंब्रह्मचिदाकारंसर्वात्मकमखंडितं॥ र्वतःसर्वदायत्सृष्टिस्थितिसंहारस्वर्गपालना राम

दियत्कुर्वंति। चिद्वपुःचैतन्यरूपोहमेवतत्तत्सर्वंकरोमीतिभावय ७ अहमिति। इदंसर्वंविश्वंअहमेव। अव्ययोविना १९
शीपरमात्माप्यहमेवमत्तोऽन्यद्भूतंनास्तिनवर्तते॥नभाविनभविष्यतीतिचिंतय ८ एकमिति। एकमद्वितीयंचिदाकारं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अखंडितं अव्ययं। निष्कंपं कंपरहितं भूरिबहु यथा स्यात्तथाशेषमुर्वरितं अशेषं सर्वं ब्रह्मैवास्तीति यत्नतश्चिंतय॥९॥
नाहमिति। अहं नास्ति। अन्यदपि नास्ति आनंदपूर्णं निरंतरं ब्रह्मैवास्तीति। अनुद्वेगात्। उद्वेगं विहाय उपास्यतां।
सेव्यतां १० ग्राह्येति। सर्वदेहिनां ग्राह्यग्राहकसंबंधे सामान्ये साधारणे सति योगिनो यत्साव धानत्वं देवात्मनो
र्चनं पूजनं। नहि पुष्पादिभिः पूजनं भवतीत्यर्थः ११॥ इति श्री योगवासिष्ठसारे टीकायां आत्मार्चनं ——— ना

निष्कंपं भूरि वाशेषमितिभावय यत्नतः ९ नाहं न चान्यद्वास्तीति ब्रह्मैवास्ति निरंतरं आनंद
पूर्णं सर्वत्रेत्यनुद्वेगादुपास्यतां १० ग्राह्यग्राहकसंबंधे सामान्ये सर्वदेहिनां योगिनः सावधा
नत्वं यत्तदर्चनमात्मनः ११॥ इति श्री योगवासिष्ठसारे आत्मार्चनं नामाष्टमं प्रकरणं
वसिष्ठ उवाच तस्मिन्देहेंद्रियादीनां संघाते स्फुरति स्वतः अयं सोहमितीभावः स जीवोमल
गुंठितः १ सर्वमेव चिदाकाशं ब्रह्मेति घननिश्चये((माष्टमं प्रकरणं ८॥ इदानीं आत्मनिरूपणं नि
रूपयति। वसिष्ठ उवाच॥ तस्मिन्निति। तस्मिन प्रसिद्धे देहेंद्रियादीनां संघाते अयं सोहमिति यो भावेन स्वतो यः स्फु
रति। स कृत्रिममलेन गुंठितश्चेष्टितो जीवो ज्ञेयः १ सर्वमिति। सर्वमिदं चिद्रूपमाकाशवत् निर्मलं ब्रह्मेति घननि

यो० टी० ३८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यानेसतिजीवोनिःस्नेहदीपवत्।तैलंविनादीपइवशमंयाति।तमेवजीवत्वंत्यजेदित्यर्थः॥अथवायमर्थः॥
यथानिस्तैलोदीपोदीपत्वंविहायमहातेजोरूपोभवति।कारणेलीयते।तद्वदित्यर्थः २ स्वेति।यथाकश्चि
द्द्विप्रोपिस्वकीयंमहत्वमुपेक्ष्यदुरीहयादुष्टचेष्टयानीचसेवादिनाशूद्रत्वमंगीकरोति।तथेश्वरआत्माऽज्ञाने
नजीवत्वमंगीकरोति ३ असत्यमिति।जीवइदंअसत्यमेवशरीरंसंकल्प्यमूढात्मासन्पश्यतिअहमितिमन्य

स्थितिंयानेशमंयातिजीवोनिःस्नेहदीपवत् २ स्वमहत्वंसंत्यज्योपेक्ष्यकश्चिद्द्विप्रोदुरीहया अं
गीकरोतिशूद्रत्वंतथाजीवत्वमीश्वरः ३ असत्यमेवसंकल्प्यभ्रमेणेदंशरीरकं जीवःपश्य
तिमूढात्माबालोयक्षमिवोत्थितं ४ मृत्तेभकेयथेभत्वंशिशुरध्यस्यवल्गति अध्यस्यात्मनि
देहादीन्मूढस्तद्वद्विचेष्टते ५ चित्रसर्पःपरिज्ञातोनसर्पभयदोयथा जीवसर्पःपरिज्ञानस्तथादुः

तियथाबालोमिथ्याभूतमुत्थितंयक्षंपश्यति ४ मृत्तेति।यथाशिशुर्बालोमृत्तेभकेमृत्तिकागजेइभत्वंगजत्वंअध्य
स्यआरोप्यवल्गतिचेष्टतेतथामूढआत्मनिदेहादीनध्यस्यचेष्टते ५ चित्रेति।यथाचित्रेलिखितःसर्पःपरिज्ञातःस
न्सर्पभयदोनभवति।तथाजीवरूपःसर्पोब्रह्मत्वेनज्ञातोदुःखदोदुःखद इनभवति। ६॥ ११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्रजीति। यथास्रजिमालायांभ्रमादुत्थितः सर्पः मालाज्ञानान्मालायामेवलीयते तथा आत्मनिभ्रमोत्थितो
भेदः आत्मनः स्वरूपज्ञानादात्मन्येव लीयते ७ नैकमिति। यथा अनेकमप्यंगदं आदिशब्देन कुंडलकंकणा
दिसंस्थितंतत् एकंहेमैवतथाउपाधिभिरनेकोप्यात्मस्वरूपतोब्रह्मरूपेणएकएव ८ शरीरइति। यथाश
रीरअवयवाहस्तपादादयोनानाभांतियथामृदोविकाराघटशरावादयोनानाभांति। तथाअद्वैतंब्रह्मैवस्था

स्रजिसर्पोयमध्यस्तोमालायामेवलीयते आत्मनिभ्रोत्थितोभेद आत्मन्येवविलीयते ७
नैकमप्यंगदाद्यंचयथैकंहेमसंस्थितं उपाधिभिरनेकोपितथात्मैकःस्वरूपतः ८ शरीरेव
यवायद्वद्विकाराश्चयथामृदः अद्वैतंद्वैतवद्भातितथास्थावरजंगमं ९ मणितोयघृतादर्शेष्वे
कमप्याननंयथा भात्यनेकमिवात्मापितथाधीष्वनुबिंबितः १० धूलिधूमांबुदैर्यद्वन्मलिनी
क्रियतेनभः परामृष्टस्तथैवात्माविशुद्धःप्राकृतैर्गुणैः ११॥ वरजंगमरूपंद्वैतवद्भाति ९ मणीति। यथा
एकमेवाननंमुखंमणौतोयेघृतेआदर्शेचपृथक्प्रतिबिंबितमपिएकमेवसत् अनेकमिवभाति। तथाएकएवा
त्माधीषुबुद्धिषुअनुबिंबितःअनेकइवभाति १० धूलीति। यथानिर्मलमपिनभोधूलिधूममेघैर्मलिनीक्रिय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्नीति। यथा लोहमग्निसंगादग्नित्वं गच्छति। तथेंद्रियादिकमात्मसंगादात्मत्वं गच्छति १२ अदृश्य इति।
यथा अदृश्यो राहुरिंदुना गृहीते न दृश्यते। तथा अनुभवमात्रात्मा रूप आत्मा दृश्येन शरीरादिना कृत्वावलोक्यते।
१३। आत्मन इति। आत्मनो जडस्य तु शरीरादेः संगादनात्मत्वं। जडस्यात्मसंगादात्मत्वं। एवं परस्पराध्यासः। त
त्र दृष्टांतः। जलाग्न्योः संगात् यथाग्नेर्जलत्वं। जलस्याग्नित्वमिति १४ असत्येति। असत्यस्य जडस्य चित्तरूप

अग्निसंगाद्यथा लोहमग्नित्वमुपगच्छति आत्मसंगात्तथा गच्छत्यात्मतामिंद्रियादिकं १२।
अदृश्यो दृश्यते राहुर्गृहीते न यथेंदुना तथानुभवमात्रात्मा दृश्येनात्मावलोक्यते १३ आत्मनो जड
संगात्स्यादनात्मत्वं जडस्य तु स्यादात्मसंगादात्मत्वं जलाग्न्योः संगवन्मिथः १४ असत्यजडचि
त्तांशनयनाच्चिद्रूपजंतुः महाजलगतो वह्निरिव रूपं स्वमुज्झति १५ इक्षौ गुडो तिले तैलं काष्ठे वह्नि

स्यांशस्य नयनाज्जडरूपांतःकरणस्य चिद्रूपत्वभावनात् चिद्रूपश्चिद्रूप आत्मा जन्तुर्जन्म उज्झति त्यजति मुक्तो भवती
त्यर्थः। तत्र दृष्टांतः। अग्निर्महाजलगतो यथा स्वरूपमग्नित्वं उज्झति १५ इक्षाविति। यथेक्षौ वर्त्तमानो गुडो यत्नेन ल
भ्यते। तिले वर्त्तमानं तैलमपि यत्नेनैव लभ्यते। काष्ठे वह्निश्च। दृषदि पाषाणे अयो लोहं यत्नेन दाहादिना लभ्यते धेनौ घृ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वपुष्षु देहेषु वर्त्तमान आत्मा यत्नेन श्रवणमनननिदिध्यासनादिना लभ्यते १६ स्फटिकेति॥ यथा नीरंध्रेपि स्फटिकात्मनि स्फटिकस्वरूपे स्थितं स्वमाकाशं वीक्ष्यते॥ तथा सर्वपदार्थेषु चिद्रूपः परमेश्वरो दृश्यते॥१७॥ बहिरिति। ज्योतिः स्वप्रकाशाद्बहिरंतः स्फुरदपि यथैकमेव। तत्र दृष्टांतः। रत्नकुंभप्रदीपवत्। रत्नैर्बहिरंतश्च कुंभप्रदीपे अंतर्मध्य एव। तथा आत्मनः स्वरूपं बहिरंतः मनसि विषयेष्वपि भासमानमेकमेव॥१८॥

धेनावाज्यं वपुष्यात्मा लभ्यते चैव यत्नतः १६ स्फटिकात्मनि नीरंध्रे स्थितं खं वीक्ष्यते यथा त
थासर्वपदार्थेषु चिद्रूपः परमेश्वरः १७ बहिरंतः स्फुरज्ज्योती रत्नकुंभप्रदीपवत् स्वप्रकाश
यथैवैकं स्वरूपं आत्मनस्तथा १८ दर्पणे बिंबितो ह्यर्कः प्रकाशं कुरुते यथा तथा प्रकाशयत्या
त्मा स्वच्छधीष्वनुबिंबितः १९ यत्र स्थिते यं विश्वश्रीः प्रतिभामात्ररूपिणी रज्ज्वां भुजंगवद्भाति ॥१९॥
२० स्वयमात्मा सदो

दर्पण इति। दर्पणे आदर्शे प्रतिबिंबितो भानुर्यथा प्रकाशं कुरुते। तथा स्वच्छधीषु निर्मलचित्तेषु अनुबिंबित आत्मा विषयान्प्रकाशयति १९ यत्रेति। यत्रात्मनि स्थिता इयं विश्वश्रीः संसारशोभा प्रतिभामात्ररूपिणी स्फूर्त्तिरूपा सती रज्ज्वां भुजंगन्यायेन भाति। स आत्मा सदा उदितः प्रकाशोस्ति। यथा रज्ज्वज्ञानं सर्पभ्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो॰वा॰ सा॰ २२ आत्मस्वरूपमाह॥श्लोकैः षड्भिः॥ आद्यंताभ्यामुत्पत्तिनाशाभ्यां रहितः चैतन्यरूपः सत्यस्त्रिकालावस्था प॰
यी विकल्पाद्भेदाद्रहितो निरूपितमाकाशं येन। तस्माद्वा एतस्मादात्मन आकाशः संभूत इति श्रुतेः॥ जीवस्याद्यः ९
स्वरूपभूतः परात्परः ईदृश आत्मा २१ आत्मेति। विशुद्धं चैतन्यं स्वमेव रूपं प्रकाशो यस्य शाश्वतो नित्यः
विभुर्व्यापकः विकाररहितः स्वयंप्रकाशः अर्कप्रकाशवत् स्वसत्तायस्य सः ईदृश आत्मा २२ आत्मेति। अत्र

आद्यंतरहितः सत्यश्चिद्रूपो निर्विकल्पकः आत्मा निरूपिताकाशो जीवस्याद्यः परात्परः २१
आत्मा विशुद्धचैतन्यस्वरूपः शाश्वतो विभुः निर्विकारः स्वयंज्योतिः स्वभावोऽर्कप्रकाशवत् २२
२२ आत्मानुभवमात्रात्मा सर्वगः सर्वसंश्रयः प्रकाशानन्यचैतन्याव्यतिरिक्तो नलोह्यवत् २३
चित्तवर्जितचिन्मात्रः परमात्मावभासकः सबाह्याभ्यंतरव्यापी निष्कलो निश्चलाश्रयः २४ य
((आत्मा चिन्मयः स्वस्थः प्रबुद्धो

भवमात्रस्वरूपः सर्वगो व्यापी सर्वेषां संश्रय आधारः प्रकाशादनन्यः प्रका
शरूपः चैतन्याद्व्यतिरिक्तश्चैतन्य रूपः यथाग्निरूष्मरूपः स आत्मा २३ चित्तेति। अंतःकरणचतुष्टयाद्भिन्नः चि
द्रूपभासकः प्रकाशकः बाह्याभ्यंतव्यापी कलातीतः निश्चल आश्रयो यस्य सः ईदृशः परमात्मा २४ यदृति। चिन्म

श्रीरामचन्द्राय नमः

राम॰ २२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वा
मवुद्धो ज्ञानरूपः अपञ्चयच्युतः क्षयरहितः हे यग्राऽऽह्या सुह्निज्ञतस्त्यक्तः देशकालजात्यादिभिरसंगतः असंब
द्धो यः स आत्मा २५ ब्रह्मांड इति। यथा ब्रह्मांडे वायुः सर्वेषु भूतेषु गतः तथा सर्वभूतगतोऽपि तन्नमुक्तोऽसंगी स्थितः।
असंगो ह्ययं पुरुष इति श्रुतेः॥ स आत्मा॥ २६॥ एवमिति। चिदंबराभोगे आभरणे ऽग्निरवौ धरायां विवरकोशेषु
तालेया चित्सैव कीटकोटरे सामान्य कीटमध्ये॥ समो मशके समो नागे इति श्रुतेः २७ नवंध इति। बंधमोक्षेकत्व

हे यग्राह्यो ह्निज्ञतो देशकालजात्याद्यसंगतः २५ ब्रह्मांडे च यथा वायुः सर्वभूतगतस्तथा स ए
व भगवानात्मा तनुमुक्तो ऽप्यस्थितः २६ एवं चिद्गगनाभोगे भूषणे ऽग्निभास्करे धराविवर
कोशस्था सैव चित्कीटकोटरे २७ नवंधोऽस्ति न मोक्षोऽस्ति ब्रह्मैवास्ति निरंतरं नैकमस्ति न च द्वैतं
संवित्स्फारं विजृंभते २८ ब्रह्म चिद्ब्रह्मभुवनं ब्रह्मभूतपरंपरा ब्रह्माहं ब्रह्मशत्रुर्ब्रह्म
मित्रबांधवाः २९ एकस्मिन्निर्मले येन परे परमपावने॥

द्वैतानि न संति। कल्पितत्वात्। किं तर्हि स्फारं संवि
द्रूपं निरंतरं ब्रह्मैवास्ति तदेव च विजृंभते प्रकाशते २८ ब्रह्मेति। चित् ज्ञानं भुवनं लोकः भूतपरंपरा जंतुश्रेणिः मम
शत्रुर्देवदत्तादिः मम मित्राणि बांधवाश्च अहं च सर्वं ब्रह्मैवेत्यवधार्यं॥ २९॥ ९ ॥ ६ ॥ ९ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चिदिति। चिच्चेत्यकलनाभास्यभासकस्यैवबंधः। तन्मुक्तिः॥ चिच्चेत्याभावएवमुक्तिः यत्तत्सर्वमात्मैवेतिस
र्वशास्त्रसिद्धांतः ३० चिदिति। इह चिदस्तिइदं विश्वं अहंचत्वंलोकाश्चचिदेवेतिसंग्रहः सिद्धांतः ३१ यदिति॥
यदस्तियज्ञातितदात्मस्वरूपमेवतद्दतिरिक्तंयज्ञातितन्नास्त्येव। केवलात्मस्वभावसंविदेवप्रतिभाति। इदंग्रा
ह्यंअयंग्रहीतेतिमृषाविकल्पोमिथ्येत्यवधार्यं॥ ३२॥ इतिश्रीयोगवासिष्ठसारे आत्मनिरूपणंनामनवमंप्रक

संश्रिताचित्तविश्रांतिर्भूत्युक्तनजिघांसति १ चिच्चेत्यकलनाबंधस्तन्मुक्तिर्मुक्तिरुच्यते चि
च्चेत्यखिलमात्मेतिसर्वसिद्धांतसंग्रहः ३० चिदिहास्तीहचिन्मात्रमिदंचिन्मयमेवच चित्त्वंचि
दहमेवेतिलोकाश्चिदितिसंग्रहः ३१ यदस्तियज्ञातितदात्मरूपंपश्चान्यतोभातिनचान्यदस्ति
स्वभावसंवित्प्रतिभातिकेवलोग्राह्यंग्रहीतेतिमृषाविकल्पः ३२ ॥इतिश्रीयोगवासिष्ठसारे
आत्मनिरूपणंनाम नवमंप्रकरणं ९॥ वसिष्ठउवाच दृश्यदर्शनसंबंधान्नभवेत्परमंसुखं न
दैवैकांतसंचिंत्यामनोनाशःपरंपदं॥ १॥ ((रंगंसमाप्तं ॥इदानींजीवन्मुक्तिंनिरूपयति॥ दृश्येति। दृ
श्यदर्शनसंबंधादिंद्रियविषयसंबंधान्नपरंसुखंजायते। एकांतसंचिंत्याब्रह्माहमितिज्ञानेनयोमनोनाशस्तदेव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri.

दृश्येति। विषयेंद्रियसंबंधेयाज्जनमा सुखसंवित् सैवदृश्यसंबंधसंवलितः दृश्यसंबंधभावसंयुक्तोबंधः। तन्मु
त्या दृश्यसंबंधाभावेकेवलंसुखभावमुक्तिरित्यर्थः २ शुद्धमिति। सदसतोर्जडजडयोर्मध्येवर्तमानंशुद्धंपदंअ
वलंब्यसबाह्याभ्यंतरंविश्वंमागृहाणमावाविमुंच। विश्वंकालत्रयेपिनास्तीत्यर्थः ३ जडेति। जडाजडज्ञानयोर्म
ध्येयत्पारमार्थिकंतत्वंअनंतंआकाशवत्हृदयंअयंतेप्राप्नोति। एतादृशंव्यापकंसत्शुद्धंतत्वंसर्वदाश्रय॥४॥

दृश्यदर्शनसंबंधेसुखसंवित्तुजनमा दृश्यसंवलितोबंधस्तन्मुक्तयामुक्तिरुच्यते २ शुद्धंसदसतो
र्मध्येपदंलब्ध्वाऽवलंब्यतत् सबाह्याभ्यंतरंविश्वंमागृहाणविमुंचमा ३ जडाजडदृशोर्मध्ये
तत्त्वंपारमार्थिकं अनंताकाशहृदयंतत्सदाश्रयसर्वदा ४ द्रष्टुर्दृश्यस्यसत्तांगबंधइत्यभिधी
यते द्रष्टादृश्यवशाद्बद्धोदृश्याभावेविमुच्यते ५ द्रष्टृदर्शनदृश्यानित्यक्त्वावासनयासह द
र्शनंप्रथमाभासमात्मानंसमुपास्महे ६ द्वयोर्मध्येगतंनित्यमस्तिनास्तीतिपक्षयोः ७ द्रष्टुरिति। द्र

ष्टुर्दृश्यस्ययासत्तासंबंधः तद्वशात्द्रष्टाबद्धः तदभावेविमुच्यते ५ द्रष्ट्रिति। द्रष्टादर्शनंदृश्यंएतानित्रीणिवास
नयासहत्यक्त्वादर्शनंप्रथममाभासंतप्रकाशंतियेनतादृशमात्मानंवयमुपास्महे ६ द्वयोरिति। अस्तिनास्तीति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· सूर्यादीनांप्रकाशकंआत्मानंसमुपास्महे ॥ यआदित्यस्तपतीतिश्रुतेः ७ निद्रेति।जागृदवस्थांतेनिद्रारंभे प्र·१०
सा· योभावउपजायतेतंभावंभावयन्‌अक्षयमानंदं सदाश्नुते ८ प्रशांतेति।प्रशांताःसर्वेसंकल्पाःयस्याईदृशीशि
२४ लावत्‌निर्व्यापाराजाग्रन्निद्राहीनायास्थितिःसास्वरूपस्थितिः ९ जडतामिति।जडतावर्जनेनयाशिलावदव

प्रकाशनंप्रकाशानामात्मानंसमुपास्महे ७ निद्रादौजागरस्यांतेयोभावउपजायते तंभावंभा
वयन्साक्षादक्षयानंदमश्नुते ८ प्रशांतसर्वसंकल्पायाशिलावदवस्थितिः जाग्रन्निद्रावि
निर्मुक्तासास्वरूपस्थितिःपरा ९ जडतांवर्जयित्वैकांशिलायाहृदयंचयत् अमनस्कमम
हाबाहोतन्मयोभवसर्वदा १० सत्यानंदचिदाकाशस्वरूपःपरमेश्वरः मृद्भाजनेषुमृदिव
सर्वत्रास्त्यपृथक्स्थितिः ११ अपारावारविस्तारांसंवित्सलिलवल्गनैः चिदेकार्णवएको
ऽयंस्वयमात्मा राम

स्थितिःहेमहाबाहोरघुनाथमनोव्यापाररहीनासर्वदातन्मयोभव १० सत्येति।सत्यःआ २४
नंदःचिद्रूपःआकाशतुल्यःपरमेश्वरःसर्वत्रअस्तिअपृथक्स्थितिरस्ति।मृत्पात्रेमृत्तिकावत्‌ ११ अपारेति।न
विद्यतेपारावारपरार्वाचीनतीरेयस्यास्तादृशीविस्तारायासंवित्तदेवसलिलंतद्वत्वल्गनैश्चिदेकार्णवएवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भरितेति। भरिताव्याप्ता अशेषादिशः कुंजाश्चयेनेहधाम अनंतं आकाशवत् निर्भरं व्यापकं चिन्मात्रं एकं सजाती
यविजातीयभेदरहितं वस्त्वेवजगत्। यथांबुधिः वाः जलमेव १३ निरंशेति। निरंशत्वान्निरवयवत्वाद्विभुत्वाद्या
पकत्वात् अनश्वरत्वाच्चपुनब्रह्मणोवस्तुनश्चनास्तिभेदः परंतुब्रह्मणःचैतन्यमधिकंनभवतुजडमित्यर्थः १४

भरिताशेषदिक्कुंजमनंताकाशनिर्भरं एवंवस्तुजगत्सर्वं चिन्मात्रंवारिवांबुधिः १३ निरंश
त्वाद्विभुत्वाच्चतथानश्वरभावतः ब्रह्मवस्तुनोर्नभेदोस्तिचैतन्यंब्रह्मणोधिकं १४ पुराणांत
रेपि सुखस्यदुःखस्यनकोपिदातापरोददातीतिकुबुद्धिरेषा अहंकरोमीतिवृथाभिमानः
कर्मोस्वसूत्रग्रथितोहिलोकः १ यस्याभिमानमोक्षेपिदेहेभिममतातथा नवाज्ञानीनैवयो
गीकेवलंदुःखभागसौ २ हरोयद्युपदिष्टातेहरिःकमलजोपिवा तथापिनतवस्वास्थ्यंसर्व
विस्मरणादृतेइति ३॥ निस्तरंगोतिगंभीरःसांद्रानंदसुधार्णवः माधुर्यैकरसाधारएकएवास्ति
सर्वतः १५ समस्तंखल्विदंब्रह्मसर्वमात्मेदमागतं॥ ॥निस्तरंगइति। ईदृशाआत्माएकएवसर्वतोस्ति

कीदृशः निस्तरंगः स्थिरः अत्यंतगंभीरः। सांद्रानंदएवसुधातस्या अर्णवः। माधुर्यमानंदएवैकरसस्तदाश्रयः १५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो· वा· इदं दृश्यं जगत् समस्तं ब्रह्मैवास्मि एवं ततोऽहमन्यदिदं जगच्चान्यदित्यखंडं ब्रह्मस्वरूपं मा खंडय १६ यदे
सा· वेति। ततं व्याप्तं अखंडितं ब्रह्मणो रूपं यदैव बुद्धं तदैव विस्तीर्णः संसारः परमेश्वरतां गतो भवति। ब्रह्मैव भो
२५ नीत्यर्थः १७ समस्तमिति। सर्वं ब्रह्मेति भावितः पुमान् ब्रह्मैव भवेत्। यथा अमृते पीते सति को नाम पुरुषः अ
मृतमयो न भवेत् १८ भव्य इति। यदि त्वं भव्योऽसि ब्रह्मज्ञोऽसि तर्हि ब्रह्मनिश्चयात् सर्वं प्राप्नोषि। नो चेद्दृढ पुण्यं

अहमन्यदिदं चान्यदित्यखंडं न खंडय १६ यदैव ब्रह्मणो रूपं ततं बुद्धमखंडितं तदा विस्ती
र्णः संसारः परमेश्वरतां गतः १७ समस्तमेव ब्रह्मेति भावितो ब्रह्मैव पुमान् पीते मृते ऽमृतम
यः को नाम न भवेदिति १८ भव्योऽसि चेत्तदेतस्मात्सर्वमाप्नोषि निश्चयात् नो चेदद्रिपि संप्रोक्तं
त्वयि भस्मनि हूयते १९ अपि विज्ञाततत्वेन तथाभ्यस्यमिदं सदा न नाम मोत्राक्तकतकफलं मं
डुप्रसादकं २० अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा
भवेत् २१॥ ((भस्मनि होमवन्निष्फलं तथैव १९ अपीति। विज्ञाततत्वेनापि इदमेव सदाभ्यस्यं अहं ब्रह्मा
स्मीति॥ तत्र दृष्टांतमाह॥ कतकफलं नाममात्रेण गृहीतेऽपि न जलप्रसादकं न भवति २० अहमिति। वासुदेवाख्यं परं ब्र

प्र· १०

॥ प्रबोधसुधाकरः॥ ज्ञानप्रकरणम् २५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नेतिनेतीति। नेतीत्यादिव्यवहारनिषेधपदवधिभूतंतदहमस्मीतिज्ञात्वासुखीभव २२ आत्मानमिति। नि
रंतरंब्रह्मैवात्मानंजानीहि। अखंडंब्रह्मध्यातृध्येयभावेननकथंखंडयसि २३ सोहमिति। चिन्मात्रंब्रह्माहम
स्मीतिस्मरणंध्यानंतस्याविस्मरणंसमाधिः २४ ब्रह्माकारेति। ज्ञानाभ्यासातिशयेनअहंकारंविनायोब्रह्मा

नेतिनेतीतिनेतीतिशेषितंयत्परंपदं निराकर्तुमशक्यत्वात्तदस्मीतिसुखीभव २२ शास्त्रांत
रेपि आचक्ष्वशृणुवातातनानाशास्त्राण्यनेकशः तथापितवनस्वास्थ्यंसर्वविस्मरणादृते १९
आत्मानंसततंब्रह्मविद्धिचैकंनिरंतरं अहंध्यातापरंध्येयमखंडंखंडसेकथं २३ सोहंचिन्मा
त्रमेवेतिचिंतनंध्यानमुच्यते ध्यानस्याविस्मृतिःसम्यक्समाधिरभिधीयते २४ ब्रह्माकारम
नोवृत्तिःप्रवाहोऽहंकृतिंविना संप्रज्ञातसमाधिःस्यात्ज्ञानाभ्यासप्रकर्षतः २५ कल्पांतवायवो
यांतुयांतुचैकत्वमर्णवाः तपंतुद्वादशादित्यानास्तिनिर्मनसःक्षतिः २६ याचितिःसर्वभूतानाम्

कारमनोवृत्तिप्रवाहःसएवसंप्रज्ञातसमाधिः २५ कल्पांतेति। कल्पांतवायुषुमव हत्सुसमुद्रेष्वेकत्वंगतेषुद्वा
दशादित्येषुतपत्स्वपिनिर्मनसोब्रह्मविदःक्षतिर्नास्तिकृतिर्नास्तीत्यर्थः २६ याचितिरिति। सर्वभूतानामुत्पत्तिना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो·वा· पूर्णानंदत्वात्सातांचितिरूपामवस्थांपश्यन्विचारयन् २७ मनइति।सचराचरंयत्किंचिज्जगत् तन्मनो
सा· मात्रविलसितंतन्मनसउन्मनीभावात्द्वैतंनास्त्येव २८ यदिति।यत्अस्पंदं निष्कंपंशिवंशांतंतन्मध्येविश्व
२६ स्यस्थितिः।चराचरविलासरूपश्चिदात्मात्रसए वएकएव २९ अहीति।अहिःसर्पःसहिनिर्ल्वयनींस्व
कंचुकंमोचनात्पुरापश्चमंआत्मतयास्वीयत्वेनजगृहे।उरगःसर्पस्तांबिलेन्यस्त्वापुनरात्मत्वेननावलोकते

तांचितिंपश्यन्नावस्थांपूर्णानंदघनामृतां २७ मनोदृश्यमिदंसर्वंयत्किंचित्सचराचरं मनसो
ह्युन्मनीभावात्द्वैतंनैवोपलभ्यते २८ यदस्पंदंशिवंशांतंयस्मात्जगतःस्थितिः संदासंदविला
सात्मासएकोत्रचिदाकृतिः २९ अहिनिर्ल्वयनीमहिरात्मतयाजगृहेपरिमोक्षणतस्तुपरा परि
पश्यतुतामुरगःस्वबिलेननिरीक्षतआत्मतयातुपुनः ३० दोषबुध्याभयातीतोनिषेधान्ननि
वर्त्तते गुणबुध्याचविहितंनकरोतियथार्भकः ३१ ॥इयमहमितिनवेत्तितथाज्ञानीदेहमितिभावः।३०

दोषेति।उभयातीतोगुणदोषहीनोब्रह्मस्वभावतएवनिषेधात्पापचरणान्निवर्त्तते।नतुदोषबुध्या।इदंपापंम
यानकार्यमितिबुध्यातुननिवर्त्तते।किंचज्ञानीविहितंस्नानसंध्यादिकंचकरोत्येवनतुगुणबुध्या।इदंमयावश्यकं

म· १० टीका रा म ३१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईदृशोऽज्ञानस्वभावइत्यर्थः ३१ अनुत्कीर्णेति। यथा अनुत्कीर्णोऽपि लिखितापि शालभंजिका पुत्तली स्तंभेस्थि तैव। असतीं कथं लिखेत्॥ तथा विश्वमविद्यमानमपि ब्रह्मणि स्थितं तेन विश्वेन हीनं तत्सदं ब्रह्मपदं नास्ति ३२ यथेति। एकएवार्थः ३३ सौम्येति। सौम्ये स्थिरे जले यथा वीचिरस्ति नास्ति च तथेदं जगत् ब्रह्मणि अस्ति नास्ति

अनुत्कीर्णा यथा स्तंभे संस्थिता शालभंजिका तथा विश्वं स्थितं तत्र तेन शून्यं न तत्पदं ३२ यथानुपुत्रिका शून्यः स्तंभोऽनुत्कीर्णपुत्रिकः तथा भातं जगद्ब्रह्म तेन शून्यपदं गतं ३३ सौम्यां भसि यथा वीचिर्नचास्ति न च नास्ति च तथा जगद्ब्रह्मणीदं शून्याशून्यपदं गतं ३४॥ ९ ॥

॥ ॥इतिश्री लघुयोगवासिष्ठसारे निर्वाणप्रकरणं दशमं॥ ॥इतिश्री योगवासिष्ठसारविवरणे महीधरकृते शून्याशून्यपदं गतं नाम दशमं प्रकरणं संपूर्णं॥ ११ च॥ अज्ञानदशायामस्ति ज्ञानदशा यां नास्तीत्यर्थः॥ तेनेदं ब्रह्म शून्याशून्यपदं गतं जगता हीनं सहितं चेत्यर्थः॥ व्यावहारिकतात्त्विकदशाभ्यामित्यर्थः॥ ३४॥ ॥इतिश्री लघुयोगवासिष्ठसारे निर्वाणप्रकरणं टीकायां दशमं॥ ९ ॥ ६ ॥ ९ ॥९

॥ यो.सा. ॥ इतिश्री योगवासिष्ठसारविवरणे महीधरकृते शून्याशून्यं नाम टीकायां दशमं प्रकरणं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः। काशीसंस्कृतमुद्रायामंकि
तोयंशिलासरैः॥ १॥ श्रीकाशीजीमेमहल्लेहौदकटोरा श्रीयुतबाबूवा
राणसीप्रसादजीकेमकानमें काशीसंस्कृतमुद्रायंत्रमेछपी जिन

इतिसटीकयोगवासिष्ठसारं समाप्तम् ॥ ॰ ॥

कोलेनाहोयउन्कोउक्तस्थानमेश्रीबाबूवाराणसीप्रसादजीकेपास
याकचौरीगलीमें भाईप्रतापसिंहजीकेदुकानपरमिलैगी॥ ॥

संवत् १९५१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri